आर.एन.आई. सं.58951/94 ISSN 0975 - 0061

# आरण्यकम्

अर्धवार्षिकं सन्दर्भितं संस्कृतशोधपत्रम्

(Bi-annual Refereed Sanskrit Research Journal)

संस्कृतप्रसारपरिषद्

आरा (विहारः)

सप्तविंशं वर्षम्-द्वितीयोऽङ्कः, अष्टाविंशं वर्षम्-प्रथमोऽङ्कः

सितम्बर 2019-मार्च 2020

## ‘आरण्यक’स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकं शोधपत्रं संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते। वर्षारम्भः चैत्रात् (मार्च तः)मन्यते।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते। मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्कमपेक्ष्यते। तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्क उपलब्धौ सत्यां प्रेषयिष्यते।
3. वार्षिकं शुल्कम् एकशतं (100) रूप्यकाणि। एकस्याङ्कस्य शुल्कम् पञ्चाशत् (50) रूप्यकाणि। शुल्कप्रेषणस्योपायाः-

   **(i) NEFT Banking**

   Bank - Indian Bank, Ara (Bihar)
   IFSC - IDIB000A047
   Name - Sanskrit Prasara Parishad
   Acc. No. - 552203784
   शुल्कं संप्रेष्य तस्य सन्देशसूचना (Message) अत्र देया-
   डॉ. नीलमणि पाठकः, दूरभाषः 09431451895,
   Email-nilmanipathak19@gmail.com

   **( ii ) बैंक ड्राफ्ट ‘संस्कृतप्रसारपरिषद्’** इति नाम्ना
   आरा (बिहार) नगरे व्यवहरणीयम्।
   **ड्राफ्ट प्रोषणस्थलम् -** डॉ. नीलमणि पाठकः, गणपति ज्वेलर्स के पीछे, महावीर स्थान, मौलाबाग, आरा (विहार)-802301

   **( iii ) धनादेशः** (M.O.) डॉ. नीलमणि पाठकस्य नाम्ना।
4. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिका निबन्धाः प्रकाशनाय गृह्यन्ते।
5. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते।
6. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किता वा स्युः। रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशश्च उल्लिखितौ स्याताम्।
7. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम्।
8. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते।
9. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः।
10. ‘आरण्यक’सम्बद्धः लेखप्रकाशनसमीक्षादिविषयकः सर्वविधपत्रव्यवहारः **प्रो. गोपबन्धु मिश्रः, कुलपतिः, श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम् ( गुजरात )-362266 इति सङ्केतेन** (चलः) 09450870788 विधेयः।
    Email-gopabandhuh@gmail.com
11. आरण्यकस्य बेबसाईट-www.aranyakam.in

# फार्म - ४

**नियमः ८ द्रष्टव्यः**

| | | | |
|---|---|---|---|
| 1. | प्रकाशनस्थानम् | : | आरा (विहारः) |
| 2. | प्रकाशनस्य अवधिः | : | अर्धवार्षिकम् |
| 3. | मुद्रकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, आरा |
| 4. | प्रकाशकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मौलाबाग आरा (विहारः) |
| 5. | सम्पादकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मौलाबाग आरा (विहारः) |
| 6. | तेषां जनानां नामानि सङ्केताश्च ये समाचारपत्रस्य स्वामिनः स्युः तथा च ये समस्तव्ययस्य एकप्रतिशतात् अधिकस्य अंशग्राहकाः स्युः | : | संस्कृतप्रसारपरिषद्, मौलाबाग आरा (विहारः) |

अहं गोपबन्धु मिश्रः एतद्द्वारा उद्घोषयामि यत् मम अधिकतमस्य बोधस्य विश्वासस्य च अनुसारेण उपरि प्रदत्तं विवरणं सत्यम् अस्ति।

**ह. गोपबन्धु मिश्रः**
सम्पादकः

## संस्कृतप्रसारपरिषद्, आरा

### प्रकाशनम्

1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्)
- स्व. पण्डित कमलाकान्त उपाध्यायः
15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक'स्य भोजपुरी-पद्यानुवादः)
-श्री देवकुमार मिश्रः 'अलमस्त'
15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा
- श्री नर्मदेश्वर ओझा
15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) - स्व. भवानीदत्त शर्मा
51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधारणा - श्री नर्मदेश्वर ओझा
51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् - पं. व्रजभूषण मिश्र 'आक्रान्तः'
41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य'
- श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
41 रूप्यकाणि
11. भावनाविलासशतकम् - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
21 रूप्यकाणि
12. हनुमच्चरितम् - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
51 रूप्यकाणि
13. उपनिषदों की भूमिका - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) - स्व. पण्डित वचन मिश्रः
15. चरितरत्नत्रयी - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
51 रूप्यकाणि
16. जगन्नाथचरितम् - डॉ. बनमाली बिश्वालः
60 रूप्यकाणि
17. कृत्-प्रत्ययविश्लेषण - डॉ. गोपबन्धु मिश्रः
204 रूप्यकाणि

# आरण्यकम्

संस्कृतप्रसारपरिषदः अर्धवार्षिकी संस्कृतशोधपत्रिका

वर्षाङ्कौ - सप्तविंशं वर्षम् - द्वितीयोऽङ्कः, अष्टाविंशं वर्षम् - प्रथमोऽङ्कः
संयुक्ताङ्कः

**आश्विनः, वि.सं. २०७६-चैत्रः, वि.सं. २०७७**

**सितम्बर २०१९ - मार्च २०२०**

**प्रतिवर्षं प्रकाशनकालः**
**चैत्रः, आश्विनः-विक्रमाब्दः**
**मार्च, सितम्बर**

*प्रत्यङ्कम् - 50 रूप्यकाणि*
*संयुक्ताङ्कः - 100 रूप्यकाणि*

*वार्षिकं शुल्कं 100 रूप्यकाणि*

**परामर्शदात्री समितिः**

डॉ. हरिहर झा, दरभङ्गा
डॉ. उमाशङ्कर शर्मा 'ऋषिः', पटना
डॉ. भागीरथ त्रिपाठी 'वागीशः शास्त्री', वाराणसी
डॉ. राय अश्विनी कुमारः, बोधगया

❁

संस्थापकः
**स्व. पण्डित व्रजभूषण मिश्र 'आक्रान्तः'**

❁


सम्पादकः
**प्रो.गोपबन्धु मिश्रः**
कुलपतिः
श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम् (गुजरात)
gopabandhuh@gmail.com

❁

सह-सम्पादकौ
**डॉ. सञ्जय कुमार चौबे**
sanjaychaubey.lbs@gmail.com
**डॉ. सुनीलकुमार प्रधानः**
sunilkumarp435@gmail.com


❁


प्रकाशिका
**संस्कृतप्रसारपरिषद्**
रामेश्वरलीलासदनम्
महावीरस्थानम्
मौलाबाग, आरा (विहारः) 802301

❁

संस्कृतप्रसारपरिषद्, आरा पक्षतः प्रो. गोपबन्धु मिश्रेण, दी महावीर प्रेस, बी.20/44, भेलूपुर, वाराणसी इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च।

**प्रो. गोपबन्धु मिश्रः**
सम्पादकः

# सम्पादकीयम्

कालस्य स्वरूपं सर्वथा अपरिमेयम्, स्थान–पात्रादिभेदेन अप्रभावितं समानं पक्षपातरहितं च सदपि देशादिस्थिति–परिणत्यादिदृष्ट्या भिद्यते। निश्चितावधौ विविधग्रहादिषु घटित–घटमानविषयनिरपेक्षतया सूर्योदयः प्रसज्यते, सूर्यास्तवृत्तिरपि भवति। दिवसश्च रात्रिश्च प्रवर्तेते। किन्तु सूर्यस्य प्रकाशः अमायाः घनता चन्द्रस्य आकारप्रकाराश्च सर्वथा समानाः न भवन्ति। नभसि भास्करे स्थितेऽपि तदधः विद्यमानपयोदसञ्चरणेन सूर्यरश्मिः न प्राप्यते, प्राप्यते चेदपि स्तिमितस्वभावो भवति। अपरं च ग्रीष्मकाले समधिकतापपरितापदग्धाः प्राणिनः 'त्राहि मां त्राहि माम्' इति कातरकण्ठाः भवन्ति। तथापि एतस्याम् असमानतायां विभिन्नतायां च सत्यामपि मूलं न व्याहन्यते, न च मूलस्य तात्पर्यं न्यूनताम् अधिरोहतीति सुतरां समीक्ष्य भारतीयमनीषा सूर्यं चन्द्रं सागरम् आकाशं वायुं जलं चेत्यादिसकलानि मौलिकानि तत्त्वानि स्तौति। न केवलं स्तौति, अपितु सकलप्राणिजातस्य कल्याणाय 'द्यौः शान्तिरन्तरिक्षं शान्तिरापः शान्तिः' इति शान्तिप्रार्थनां च विधत्ते। भगवतः सूर्यस्य तुष्टये सूर्यषष्ठीव्रतमिव कठोरं व्रतमाचरति, जले गङ्गायमुनादितीर्थानां परिकल्पनया जलस्य प्रतिबिन्दु महत्त्वम् उररीकरोति। गृहनिर्माणादि उद्दिश्य मृत्तिकाखननव्यापारात् प्राक् पृथिवीं स्तौति, कृषिकर्मणः प्रारम्भात् प्राक् कृषिक्षेत्रगतां धरित्रीं पूजयति। एतादृशैः प्रतिदिनं प्रतिवत्सरं च क्रियमाणैः कृत्यैः भारतीयचिन्तनपरम्परायां मूलभूतमहाभूतादीनां विषये तत्तदधिकरणप्रपञ्चानुसारं महत्त्वावबोधः स्थायिरूपेण विद्यमानोऽस्ति इति एतादृशी अनुपमेयं भारतीया संस्कृतिः। अत्र न केवलम् इहलोकगतसुखसाधनसमृद्धये काम्यकर्मसु प्रवृत्तिर्भवति, अपि तु जन्मान्तरे अस्य जन्मनः सञ्चितार्थाः मूलतः सुखदुःखमोहादीनां विषये कारणानि भवन्तीति विचारणया त्यागतपः-परोपकारदानास्तेयादिषु सत्कर्मसु प्रवर्तनं परिदृश्यते। एतादृशकृत्याकृत्यप्रवृत्तिनिवृत्तिरूपा या भारतीया वृत्तिः भारतीयो विवेकः वा तदर्थं नित्यम् उत्सरूपेण वेदेषु वेदोत्तरसंस्कृत-वाङ्मयेषु च सम्यक्तया उपलभ्यते इति अस्माकं कृते एषः महतो गौरवस्य विषयः।

किं च एतेषां सर्वविधतात्त्विकज्ञानानां महाभाष्योक्त्या आगमकालेन, स्वाध्यायकालेन, प्रवचनकालेन, व्यवहारकालेन चेति चतुर्विधकालैः सम्यग्रीत्या उपयोगः करणीयः। तथैव नैषधीयवचनानुसारम् 'अधीतिबोधाचरणप्रचारणैः' विद्यानां सर्वकल्याणाय प्रवर्तनम् अपेक्ष्यते। उभयोरेतयोः मनीषिणोः चतुर्विधानाम् उपायानां व्यत्ययेन अथवा तेषु कस्यचित् एकस्य द्वयोर्वा न्यूनतया अपेक्षितं कल्याणं नैव सम्पद्यत इति निहितार्थो व्यज्यते। अर्थात् आगमं विना स्वाध्यायः अथवा स्वाध्यायं विना केवलम् आगमः अथवा आगमस्वाध्याययोः सतोरपि

प्रवचनव्यवहारयोः अथवा तयोः अन्यतरस्य न्यूनता चेत् परिणतिः आदर्शरूपा न भवति। अतस्तत्त्वानां तद्गतज्ञानानां संरक्षणार्थं सम्पोषणार्थं संचारार्थं च एते उपायाः अवलम्बनीया इति अस्माभिरवगन्तव्यम्। अत्र तद् भवतु नाम कस्यचित् तत्त्वचिन्तनस्य लघुरपि कश्चिदंशः, तस्य कृतेऽपि उपायास्तु एते एव स्वीकरणीयाः, यतो हि 'न हि सर्वः सर्वं जानाति', न च सर्वं जानीयादपि। किन्तु यदंशं कश्चित् जानीयात्, तदंशविशेषः एतैरुपर्युक्तैः मार्गैः शोधनीयः, येन तावदंशः सुदृढः तेजोमयः परमोपयोगी च भूयात्।

'आरण्यकम्' इदं वर्षाणि चलित्वा अग्रेऽपि चलितुम् आत्मनः प्रयासम् उपनिषीदति। यथेदानीमुपरि अस्माभिः विमृष्टं तथा कालविशेषे नानाविधस्पर्धाह्वानं सम्मुखीकरणीयं भवत्येव सर्वेषां कृते, आरण्यकेनानेनापि तत् तथाऽनुभूतम् अनुभूयमानं चास्ति। तथापि मूलं स्तोतव्यं, मूलरक्षणाय तपस्तप्तव्यम्, तदर्थम् अन्तः शोधनीयम्, विषयजातं संशोधनीयं चेत्येतदर्थम् आरण्यकवृत्तिः समुपदिष्टाऽस्तीति रहसि स्वमनोगतं भावं विमृश्य 'आरण्यकम्' इदं किञ्चिद् व्यवहितमपि चलितुं प्रभवति।

सर्वेषां सहृदयानां भवताम् अन्तःस्थिताय शिवाय शिवतराय च भूयो भूयो नमांसि।

**विदुषां वशंवदः**

गोपबन्धु मिश्र

**सम्पादकः**

# सूचीपत्रम्


| | विषयः | लेखकः | पृष्ठम् |
|---|---|---|---|
| 1. | **व्याकरणनये वीप्सापदार्थ-निरूपणप्रसङ्गे भाषावैज्ञानिकचिन्तनम्** | डॉ. सुकुमार चट्टोपाध्यायः<br>सहाचार्यः, संस्कृतविभागः,<br>काशीहिन्दूविश्वविद्यालयः,<br>वाराणसी | 1-6 |
| 2. | **शृङ्गारप्रकाशप्रतिपादितः शृङ्गाररसः** | सुदीपकुमारपाठकः<br>संस्कृत-अध्यापकः,<br>शिक्षा निदेशालयः,<br>दिल्लीसर्वकारः, दिल्ली | 7-14 |
| 3. | **कर्तृत्वविचारः** | रामबाबू पाण्डेयः<br>आरजी-ए 35/36 यू.जी.<br>मंजील गली नं.10<br>दुर्गा पार्क, नव देहली-45 | 15-19 |
| 4. | **किञ्चिद् रामायणीयम्** | अरण्यकाण्डम् | 20 |
| 5. | **संस्कृते वानस्पतिकचेतना 'प्रेमरहस्यं' च** | डॉ. रत्नमोहन झा<br>सहाचार्यः, दूरस्थशिक्षा<br>केन्द्रीयसंस्कृतविश्वविद्यालयः,<br>नवदेहली | 21-34 |

| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| 6. **संस्कृतसाहित्ये गीतकाव्यविधा** | डॉ. सत्येन्द्रपाण्डेयः<br>सहायकाचार्यः<br>संस्कृतविभागः,जगजीवनकॉलेज<br>वी.के.एस.यू., आरा (बिहार) | 35-42 |
| 7. **संस्कृतस्य शास्त्रीयपरम्परायां टीकासाहित्यस्य स्थानम्** | डॉ. ओम प्रकाश आर्यः<br>सहायकाचार्यः, संस्कृत विभागः<br>महाराजा कॉलेज,<br>वीर कुँवर सिंह विश्वविद्यालयः,<br>आरा (बिहार) | 43-49 |
| 8. **किञ्चिद् रामायणीयम्** | अरण्यकाण्डम् | 50 |


***

# व्याकरणनये वीप्सापदार्थनिरूपणप्रसङ्गे भाषावैज्ञानिकचिन्तनम्

**सुकुमार चट्टोपाध्यायः**

शब्दस्य नित्यत्वात् वीप्सायां पदस्य द्विर्वचनं द्विरुक्तिर्वा पदसंघटनम् आवैदिककालात् शास्त्रकारेण साहित्यरचनाकारेण वा प्रयुक्ता। इयं द्विरुक्तिः न सार्वत्रिकं दोषरूपेण ग्राह्या। परन्तु एतत् कथनं समीचीनं यत् इयं द्विरुक्तिः काव्यसौन्दर्यस्य परिचायिका। दैनिकवाग्व्यवहारे तथा शब्दरचनायां प्रयोक्तुः व्याप्तिप्रतिपादनेच्छायां गम्यमानायां पदस्य द्विरुक्तिः न केवलं शब्दसौन्दर्यवर्धनार्थमपितु विशेषार्थबोधनार्थमिति मन्यते।

पदस्य द्विरुक्तिविचारार्थं महर्षिपाणिनिः अनन्तलौकिकवैदिकशब्दराशेः प्रत्यक्षं कृत्वा अष्टाध्याय्यां पञ्चदश सूत्राणि व्यरचयत्। तत्र द्विरुक्तिविषयकसूत्राणि द्विरुक्तिप्रकरणे[1] निबद्धानि सन्ति। तद्यथा– 'सर्वस्य द्वे' 'तस्य परमाम्रेडितम्' 'अनुदात्तञ्च', 'नित्यवीप्सयोः', इत्यादीनि। पदस्य द्विर्वचनप्रयोगः मुख्यतया विशिष्टार्थबोधनार्थं, तर्हि शब्दप्रक्रियासाधनाय अत्र न सर्वाणि सूत्राणि उपस्थाप्यन्ते परन्तु भिन्नार्थे यथा–आभीक्ष्ण्ये, वर्जनार्थे, सामीप्यार्थे, असूयायां, सम्मतौ, कोपे, कुत्सने, भर्त्सने अर्थात् निन्दायां, पीडायां, सादृश्ये, आनुपूर्व्ये, संभ्रमेण प्रवृत्तौ, पौनः पुन्ये, भृशार्थे अपि च वीप्सायां द्योत्ये तथा च यथाशब्दस्य स्वशब्देन अव्ययीभावार्थे द्विर्वचनप्रयोगोऽपि संस्कृतसाहित्ये दरीदृश्यते। एवमन्यत्रापि यथा अकृच्छ्रे अर्थात् अनायासार्थे गम्ये प्रियस्य तथा सुखस्य च शब्दस्य द्विरुक्तिः वा भवति। तर्हि संस्कृतसाहित्ये द्विरुक्तिः द्विर्वचनं वा अत्यन्तं महत्त्वपूर्णो विषयः।

द्विरुक्तिप्रकरणे वीप्साविषयस्य व्यापकार्थत्वात् महाभाष्ये वीप्सापदार्थनिर्णयप्रसङ्गे अत्र ऋग्वेदादि–ग्रन्थादारभ्य संस्कृतसाहित्ये तथा च दैनिकवाग्व्यवहारे यत्र कुत्रापि प्रयोगाः समुपलभ्यन्ते तद् भाषावैज्ञानिकचिन्तनमाध्यमेन प्रस्तूयते।

वीप्सा–शब्दस्य मुख्यार्थः व्याप्तिप्रतिपादनेच्छा। वोपदेवकृत–मुग्धबोधव्याकरणोपरि धातुदीपिकाटीकायाः रचयिता सप्तदशशताब्दीस्थदुर्गादासविद्यावागीशेनोक्तम्– 'वीप्सा-

क्रियागुणद्रव्यैर्युगपद् व्याप्तुमिच्छा' वीप्साशब्दस्य निष्पत्तिः 'आप्लृ व्याप्तौ' इति व्याप्त्यर्थकाद् विपूर्वकाद् आप् धातोरिच्छायां सन् प्रत्यये 'सन्यङोः' इति सूत्रेण द्वित्वे 'पूर्वोऽभ्यासः' इति सूत्रेण पूर्वभागस्याभ्याससंज्ञायाम् 'अत्र लोपोऽभ्यासस्य' इति सूत्रेणाभ्यासस्य लोपे 'आप्ज्ञप्यृधामीत्' इति सूत्रेण सनि परे आकारस्य ईकारत्वे 'वि- इत्युपसर्गस्थितेकारेण सह दीर्घे 'वीप्स' इत्यस्मात् 'अप्रत्ययात्' इति सूत्रेण 'अ' प्रत्यये टापि च सति वीप्साशब्दः सिध्यति।

अष्टाध्याय्यां सूत्रचतुष्टये वीप्साशब्दस्योल्लेखः परिदृश्यते। तद् यथा–

1. 'नित्यवीप्सयोः'[2] इति अष्टमाध्यायस्य प्रथमे पादे द्विरुक्तप्रकरणे।
2. 'लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः'[3] इति कर्मप्रवचनीयसंज्ञाप्रसङ्गे।
3. 'पादशतस्य संख्यादेर्वीप्सायां वुन्लोपश्च'[4] इति स्वार्थिकप्रकरणे।
4. 'संख्यैकवचनाच्च वीप्सायाम्'[5] इति अव्ययसंज्ञाप्रसङ्गे।

उपर्युक्ते सूत्रचतुष्टये वीप्साविषये 'संख्यैकवचनाच्च वीप्सायाम्' इति सूत्रस्य व्याख्यानं महाभाष्यकारेण स्पष्टत्वाद् उपेक्षितम्। परन्तु वीप्साशब्दस्य स्पष्टीकरणं केवलं 'नित्यवीप्सयोः' सूत्रप्रसङ्गे महाभाष्ये सारेण चोक्तम्– 'अथ किमिदं वीप्सेति? आप्नोतेरयं विपूर्वादिच्छायामर्थे सन् विधीयते इति ग्रन्थेन वीप्साशब्दार्थं निरुच्य पूर्वपक्षरूपेण उपस्थापयति–यद्येवं चिकीर्षति जिहीर्षतीत्यत्रापि प्राप्नोति। तदनन्तरं समाधानभाष्यं निगदति–'नैष दोषः–नैवं विज्ञायते–वीप्सायामभिधेयायामिति? कथं तर्हि? कर्तृविशेषणमेतत्। वीप्सतीति वीप्सः। वीप्सश्चेत् कर्ता भवतीति। कः पुनर्वीप्सार्थः? अनवयवाभिधानं वीप्सार्थः। अनवयवेन द्रव्याणामभिधानमेव वीप्सार्थः' इत्यनेन समाधानस्य प्रयासः कृतः। भाष्यस्य योऽभिप्रायस्तत् सर्वमेव स्वरचिते प्रदीपे पदवाक्यप्रमाणज्ञेनाचार्येण कैयटेन स्पष्टीकृतम्– ''कः पुनर्वीप्सार्थः। अर्थः प्रयोजनम्। एवंभूताया वीप्साया उपादाने किं प्रयोजनमिति प्रश्नः। अनवयवाभिधानमिति– साकल्येन द्रव्याणां क्रियागुणसम्बन्धप्रतिपादनं वीप्साफलमित्यर्थः'' इति।

**अनवयवाभिधानप्रसङ्गे महाभाष्यकारेणोक्तम्–**'अनवयवाभिधानं वीप्सार्थ इति चेत्, जात्याख्यायां द्विर्वचनं प्राप्नोति। 'व्रीहिर्यव' इति। 'न वैकार्थत्वाज्जातेः' न चैष दोषः। किं कारणम्? एकार्थो हि जातिः। एकमर्थं प्रत्याययिष्यामीति जातिशब्दः प्रयुज्यते। अनेकार्थाश्रयत्वाच्च वीप्सायाः। अनेकार्थाश्रया च पुनर्वीप्सा। अनेकमर्थ-संप्रत्याययिष्यामीति वीप्सा प्रयुज्यते। एकार्थत्वाज्जातेरनेकार्थाश्रयत्वाच्च वीप्साया जात्याख्यायां द्विर्वचनं न भविष्यति' इति।

**वीप्साविषयस्य स्पष्टीकरणार्थं वृत्तिकारैरप्युक्तम्–**'नानावचनानामधिकरणानां क्रियागुणाभ्यां युगपत् प्रयोक्तुर्व्याप्तुमिच्छा वीप्सा इति। सर्वत्रैव वीप्साविषयत्वाद् द्विर्वचनं वीप्साशब्देनोच्यते। अत एव कैयटेन वृत्तिकारमतसिद्धं वीप्साया यत् स्वरूपं दर्शितं तत्र प्रयोक्तुः कात्स्न्र्येच्छा अर्थात् सामग्रिकेच्छा बोध्यते।

**वीप्साविषये परवर्तिनां** वैयाकरणानां मतमपि उपस्थाप्यतेऽत्र। काशिकायां नित्यं वीप्सां व्याख्यास्यन् विषयमुखेन वीप्साशब्दस्य व्याख्याप्रसङ्गे वामनाचार्येणोक्तम्– अथ केषु वीप्सा? सुप्सु वीप्सा। का पुनर्वीप्सा? व्याप्तिविशेषविषया प्रयोक्तुरिच्छा वीप्सा। का पुनः सा? नानावाचिनामधिकरणानां क्रियागुणाभ्यां युगपत् प्रयोक्तु-र्व्याप्तुमिच्छा वीप्सा। तर्हि नानाभूतार्थवाचिनां शब्दानां यान्यधिकरणानि वाच्यानि तेषां क्रियागुणाभ्यां युगपत् प्रयोक्तुमिच्छा। तद् यथा–ग्रामो ग्रामो रमणीयः। जनपदो जनपदो रमणीयः। पुरुषः पुरुषो निधनमुपैति।

**'नित्यवीप्सयोः' इति सूत्रस्य विवरणावसरे सिद्धान्तकौमुद्यां भट्टोजीदीक्षितेन प्रस्तूयते–**'आभीक्ष्ण्ये वीप्सायां च द्योत्ये पदस्य द्विर्वचनं स्यात्। आभीक्ष्ण्यं तिङन्तेष्वव्ययसंज्ञकं कृदन्तेषु च। पचति पचति। भुक्त्वा भुक्त्वा। वीप्सायां–वृक्षं वृक्षं सिञ्चति। ग्रामो ग्रामो रमणीयः। अत्र 'पदस्य' इति शब्दस्य 'पदस्य'[6] इति सूत्रादनुकर्षणमिति वेदितव्यम्। किन्तु अत्र वीप्साशब्दस्य स्पष्टीकरणं नास्ति, केवलं दृष्टान्तद्वयस्योपस्थापनं दृश्यते। वैयाकरणसिद्धान्तकौमुदीव्याख्यायां तत्त्वबोधिन्यां वीप्साशब्दस्यार्थः स्पष्टीक्रियते। तथाहि– 'वीप्सायामिति–व्याप्तुमिच्छा वीप्सा। व्याप्तिप्रतिपिपादयिषेति यावत्। सा च प्रयोक्तुर्धर्म आबाधवत्। गत गत इत्युक्ते प्रियस्य चिरगामिनादिनापीडितो वाक्यं प्रयुङ्क्ते इति यथा प्रतीयते, तथा वृक्षं वृक्षं सिञ्चतीत्यादावपि व्याप्तिं बुबोधयिषोरिदं वाक्यमित्यवगमात्। शाब्दबोधविषयस्तु व्याप्तिरेव। तथा च 'नित्यव्याप्त्योः' इत्येव सूत्रयितुं शक्यम्। व्याप्तिरिह कात्स्न्र्यम् इति। तर्हि व्याप्तिरेव शाब्दबोधविषयः।

द्रव्याणां क्रियागुणाभ्यां सह युगपत् सम्बन्धरूपं वीप्साया यादृशं स्वरूपं कैयटाचार्येण स्पष्टीकृतं तदुपदर्शयता नागेशभट्टेनापि उद्द्योते प्रदर्शितम्। तथाहि– 'युगपदिति क्रियागुणाभ्यां युगपद् व्यापकत्वेनान्वयं बोधयितुमिच्छेत्यर्थः' इति।

व्याकरणपरम्परानुसारं वीप्सापदस्य शास्त्रार्थविचारणादनन्तरं अधुना भाषावैज्ञानिक-दृष्ट्या वीप्साविषयस्योद्भवस्तथा च विकासः विचार्यते। शब्दस्य नित्यत्वात् आवैदिककालात् मन्त्रद्रष्टार ऋषयस्तथा च कवयः वाग्व्यवहारकाले वक्तुः शास्त्रकर्तुः वा वीप्सार्थे पदस्य व्याप्तिप्रतिपादनेच्छायां द्विर्वचनप्रयोगमाध्यमेन औत्सुक्यं प्रादर्शयन्।

संहितायां वीप्सापदार्थस्य बहवः प्रयोगाः ऋषीणां काव्यसौन्दर्यस्य पराकाष्ठारूपेण यत्र तत्र दरीदृश्यते। तद्यथा– रूपं रूपं प्रतिरूपो बभूव (ऋ.वे.6.47.18), रूपं रूपं मघवा बोभवीति (ऋ.वे.3.53.8), रूपं रूपं अधुः सुते (य.वे.20-64), रूपं रूपं वयो वयः (अ.वे.1.22.3। अत्र 'रूपं' तथा 'वयः' शब्दः वीप्सार्थे। एवं कौशिकसूत्रे– रूपं रूपं कृण्वानः (1.135.9) 'प्रतिदिनं', 'प्रत्यहम्' इति अव्ययीभावार्थे वीप्सार्थकताज्ञापनार्थे 'दिवे दिवे' पदस्य सर्वाधिक प्रयोगे वैदिक- ऋषीणामत्याग्रहः दरीदृश्यते। तद्यथा– उप त्वाग्ने दिवे दिवे (ऋ.वे.1.1.7), दिवे दिवे अधि नामा दधाना (ऋ.वे.1.123.4), दिवे दिवे चिदश्विना सखीयम् (ऋ.वे.5.49.1), दिवे दिवे जायमानस्य दस्म (ऋ.वे.2.9.5), दिवे दिवे धुनयो यन्त्यर्थम् (ऋ.वे.2.30.2), दिवे दिवे पीतिम् इद् अस्य वक्षि (ऋ.वे.7.98.2, अ.वे.20.87.2), दिवे दिवे वरुणो मित्रो अग्निः (ऋ.वे.3.4.2), दिवे दिवे वामम् अस्मभ्यं सावीः (ऋ.वे.6.71.6, य.वे.8.6; तै.सं.1.4.23.1, 2.2.12.2; मै.सं.4.12.2, 1.80.13; श.ब्रा.4.4.1.6; आप.श्रौ.सू. 6.23.1), दिवे दिवे विवेशुरमृष्यम् (ऋ.वे.6.32.5), दिवे दिवे सदृशीरद्धि धानाः (ऋ.वे.3.35.3), दिवे दिवे सदृशोरन्यधर्मम् (ऋ.वे.6.47.21), दिवे दिवे सदृशीर इन्द्र तुभ्यम् (ऋ.वे.3.52.8), दिवे दिवे सहुरिस्तन्नबाधितः (ऋ.वे.10.92.8), दिवे दिवे सूर्यो दर्शतो भूत् (ऋ.वे.6.30.2), दिवे दिवे सौभगम् सुन्वन्ति (ऋ.वे.4.54.6), दिवे दिवे हर्यश्वप्रसूताः (ऋ.वे.3.30.12), प्रभृतिप्रयोगे। अधुनापि वीप्सार्थे अव्ययीभावरूपे 'प्रतिदिनं' शब्दस्य प्रयोगः बहुप्रचलितः। एवमन्यत्रापि यथा–गृहं गृहमहना यात्यच्छा दिवे दिवे अधि नाम दधाना (ऋ.वे.1.123.4), सायणमते अस्यार्थः 'प्रतिगृहम्'।, एवम् 'अग्निमग्निं वः समिधा (ऋ.वे.6.15.6) अग्निमग्निं हविमभिः (ऋ.वे.1.12.2) 'अग्निमग्निं वो अध्रिगुं (ऋ.वे.8.60.17), वने वने शिश्रिये तक्करीव (ऋ.वे.10.91.20)। एवं दिग्वाचिशब्दानां वीप्सार्थे प्रयोगाः– आशमाशां विद्योततां वाता वान्तु दिशो दिशः (अ.वे.4.15.8), आशमाशां विषासाहि (अ.वे.12.1.54) आशमाशां रम्यं नः कृणोतु (अ.वे.12.1.43), दिशो दिशः शालाया नमो महिम्न स्वाहा (अ.वे.9.3.31), दिशो दिशः अग्ने परि पाहि घोरात् (अ.वे.18.4.9), दिशो दिशः जङ्गिडो पात्वस्मान् (अ.वे.19.35.4), वनेषु चित्रं विश्वं विशे विशे (ऋ.वे.4.7.1) अस्याग्नेयमन्त्रस्य भाष्ये विशे विशे इति द्विर्वचनप्रसङ्गे सायणाचार्येणोक्तम्– 'वीप्सया सर्वजनव्याप्तिर्गृह्यते।' पुनः विशे विशे यज्ञियाय (अ.वे.1.27.10) इत्यत्रापि वीप्सा।

एवं 'पदे' पदस्य द्विरुक्तिः वैदिकसंहितायां यथा– पदे पदे पाशिनः सन्ति सेतवः (ऋ.वे.9.73.4), पदे पदे मे जरिमा निधायि (ऋ.वे.5.41.15) इत्यादिस्थले। एवं सर्वदार्थे शश्वत् शश्वत् ऊतिभिः (ऋ.वे.3.36.1) अन्यत्रापि यथा– देवं देवं वोऽवसे इन्द्रं इन्द्रं (ऋ.वे.8.12.9), देवं देवं वोऽवसे देवं देवं (ऋ.वे.8.27.13), यतो यतः समीहसे ततो नो अभयं कुरु (य.वे. 36.22) इत्यादिमन्त्रांशे वीप्सा-पदार्थस्य प्रयोगः न केवलं द्विवर्चनप्रदर्शनार्थमपितु मन्त्रगतकाव्यसौन्दर्यस्य पराकाष्ठारूपेण चारुत्ववर्धनार्थम्। व्याकरणशास्त्रानुसारं सुप्सु वीप्सा। तर्हि संहितायाम् 'रूपं रूपं', 'दिवे दिवे' 'गृहं गृहं' 'अग्निम् अग्निम्' 'वने वने', 'आशाम् आशाम्' 'दिशः दिशः', 'विशे विशे', 'पदे पदे', 'शश्वत् शश्वत्', 'देवं देवं', 'इन्द्रम् इन्द्रम्', 'यतो यतः' इत्यादौ उल्लिखितमन्त्रांशे वीप्सापदार्थस्य प्रयोगाधिक्ये वैदिकऋषीणां काव्यसौन्दर्यस्य साक्षात् दर्शनम् इति यथार्थरूपेण दरीदृश्यते।

लौकिकसंस्कृतभाषायामपि विशेषतः काव्यग्रन्थेषु वीप्सार्थे पदस्य द्विर्वचनप्रयोगाः यथा–मेघदूते–'मन्दं मन्दं नुदति पवनः[7], काले काले भवति भवतो[8], खिन्न खिन्नः... क्षीणः क्षीणः[9] इत्यादयः। मेघदूतस्य टीकाकारेण मल्लिनाथेन 'मन्दं मन्दं'– इत्यादि श्लोकस्य व्याख्याप्रसङ्गे सञ्जीवनीटीकायामुक्तम्– 'अत्र वीप्सायामेव मन्दशब्दस्य द्वित्वं निर्वाह्यम्।' प्रसङ्गेऽस्मिन् वामनाचार्येण काव्यालङ्कारसूत्रवृत्तिग्रन्थे उक्तम्– मन्दं मन्दमित्यप्रकारार्थत्वे[10] 'मन्दं मन्दं नुदति पवनः इत्यत्र 'मन्दं मन्दम्' इत्यपकारार्थे भवति। प्रकारार्थत्वे तु "प्रकारे गुणवचनस्य"[11] इति द्विर्वचने कृते कर्मधारयवद्भावे मन्दमन्दमिति प्रयोगः। मन्दं मन्दमित्यत्र तु 'नित्यवीप्सयोः[12] इति द्विर्वचनम्। अनेकभागात्मकस्य नुदेर्यदा सर्वे भागा मन्दत्वेन व्याप्तुमिच्छुकाः भवन्ति तदा वीप्सा इति। वस्तुतस्तु पाणिनिसूत्रेणापि एतत् समर्थ्यते।

**अस्मिन् वीप्साविचारप्रसङ्गे वामनाचार्येणोक्तम्–**उपर्यादिषु सामीप्ये द्विरुक्तेषु द्वितीया[13] पुनः स्वकीये वृत्तिमुखे स्पष्टीकृतमेतत्। तद्यथा– 'उपर्यादिषु शब्देषु सामीप्ये द्विरुक्तेषु 'उपर्यध्यधसः सामीप्ये[14] इत्यनेन 'उपर्यादिषु त्रिषु द्वितीयाम्रेडितान्तेषु' इति द्वितीया। वीप्सायां तु द्विरुक्तेषु षष्ठ्येव भवति–

'उपर्युपरि बुद्धीनां चरन्तीश्वरबुद्धयः।' इति उत्तररामचरितेऽपि वीप्सापदार्थस्य प्रयोगः काव्यसौन्दर्यवर्धनार्थम्। तद्यथा– "मोहे मोहे रामभद्रस्य जीवं स्वैरं स्वैरं प्रेषितैस्तर्पयेति।[15] अत्र 'स्वैरं स्वैरं' इति द्विर्वचनस्यार्थः मन्दप्रकारम् एवमुत्तररामचरिते अन्यत्रापि यथा– 'किमपि किमपि मन्दं मन्दं...।'[16] इत्यादि।

वीप्सापदार्थस्य प्रयोगः भाषायाः सौन्दर्यवर्धनार्थं प्रायः प्रत्येकभारतीयभाषायां अस्य प्रयोगः दृश्यते। तद् यथा बङ्गभाषायां– 'मधुर मधुर वंशी बाजे', 'काले काले देखिव कत', 'दिने दिने उन्नति', 'दिके दिके प्रचारित तव वाणी', 'पदे पदे बाधा' इत्यादि। एवञ्च हिन्दीभाषामपि वीप्सापदार्थस्य विवेचनं दृश्यते। तद्यथा–

**'रीझि रीझि, रहसि रहसि हँसी हँसी उठे।'**

**'मोहि मोहि मोहन को मन भयो राधामय।'**

एवमन्यभारतीयभाषायामपि वीप्सार्थकशब्दस्य प्रयोगाः अन्वेष्टव्याः।

द्विरुक्तिः द्विर्वचनं वा न सर्वत्र वीप्सार्थकम्। कुत्रापि आभीक्ष्ण्यार्थकं कुत्रापि आम्रेडितार्थकम्। व्याकरणशास्त्रानुसारं वीप्सायां द्विरुक्तिः एकार्थिका अर्थात् एकजातीय-द्रव्यगुणक्रियार्थिका। किन्तु काव्यशास्त्रानुसारं यमकालंकारे द्विरुक्तिः भिन्नार्थकः। विषयेऽस्मिन् मनसि संशयः जायते किं निरर्थकानामपि वीप्सा भवति? 'वीप्साविचार' इति ग्रन्थस्योल्लेखः मनियर विलियम् महोदयेन सम्पादितसंस्कृतांग्लाभिधाने दृश्यते। एषोऽपि नवीनशोधकार्यस्य विषयः।

द्विर्वचनात्मकः फट्–फट्, वारं–वारं, गम् -गम् इत्यादि शब्दाः ध्वन्यात्मकाः वीप्सारूपेण दृश्यन्ते।

विषयस्योपसंहाररूपेण वक्तुं शक्यते यद् एवमेव उपर्युक्तविवेचनमाध्यमेन वीप्सापदार्थस्य व्याप्तिः परिस्फुटिता। विषयेऽस्मिन् दिङ्मात्रमेव दर्शितमत्र। विविधशास्त्रेषु विविधासु भाषासु वीप्सापदार्थस्य विचारेण एतज्ज्ञायते यत् वीप्सा–शब्दस्य नित्यशब्दरूपेण सर्वव्यापकधर्मत्वात् विश्वात्मना सह एकीभूता भूत्वा स्वतन्त्रतया एकं विशिष्टस्थानं लभते। उत्तरकाले वीप्सापदार्थस्य विचारार्थं नवनवगवेषणाकार्यमाध्यमेन नवनवदिगन्तस्य, तथ्यस्य, तत्त्वस्य चोद्घाटनं भविष्यति इति कामये।

***

**सन्दर्भाः–**


1. पा. 8.1.1-8.1.15
2. पा. 8.1.4
3. पा. 1.4.90
4. पा. 5.4.1
5. पा. 5.4.43
6. पा. 8.1.16
7. पूर्वमेघः 10
8. पूर्वमेघः 12
9. पूर्वमेघ 13
10. का.सू.5.2.85
11. पा. 8.1.12
12. पा. 8.1.4
13. का.सू. 5.2.84
14. पा. 8.1.7
15. उत्तररामचरितम् 3.2
16. उत्तररामचरितम् 1.27


***

# श्रृङ्गारप्रकाशप्रतिपादितः श्रृङ्गाररसः

**सुदीपकुमारपाठकः**

उपनिषत्सु रसः ब्रह्मानन्दस्वरूपेण समुपवर्णितो विद्यते। तं रसमेव सम्प्राप्य आनन्दो जायते।[1] वैदिकसंहितायां रसशब्दस्य प्रयोगः आनन्दार्थे वर्तते।[2] प्रश्नोपनिषदि रसपदं रसनीयतायाः अर्थं प्रकटयति।[3] न्याय–वैशेषिकदर्शने रसः गुणपदार्थत्वेन तिष्ठति।[4] इत्येवं वेदादिषु संकीर्तितो रसः काव्यशास्त्रेऽपि विवेचनपथमवतरति। भरतमुनिः नाट्यशास्त्रे रस–अर्थयोः अन्योन्याभावं प्रतिपादयति।[5] सः रसः एव आनन्दस्थानं वर्तते। वेदादिषु ब्रह्मणः यत् स्थानं तदेव काव्यशास्त्रे रसस्याप्यस्ति। ब्रह्मानन्दस्य आत्मानन्दस्य वा यन्महत्त्वं वर्तते, यथा तस्यास्वादनं संभवति तथैव काव्यगतस्य रसस्यापि आस्वादनं संभवति। यथा ब्रह्मानन्दे आस्वाद्यमानतास्ति तथैव रसेऽपि केवलम् आस्वाद्यता एव। अत एव रसस्येयं व्युत्पत्तिः **रस्यते आस्वाद्यते इति रसः** इति क्रियते।

संस्कृतग्रन्थेषु रसस्य स्वरूपं बहुधा प्रतिपादितमस्ति तथापि नाट्यशास्त्राचार्येण भरतमुनिना सर्वप्रथमं काव्यरसस्य उत नाट्यरसस्य स्वरूपं प्रत्यपादि। तन्मते लोके निर्वेदादिभावानाम् अभिव्यक्तेः यानि कारणानि भवन्ति, यानि कार्याणि भवन्ति यानि सहकारीणि च भवन्ति तानि एव लोके विभाव–अनुभाव–संचारिशब्देन ख्यातानि परस्परं मिलित्वा रसनिष्पत्तेः कारणानि भवन्ति।[6] ततोऽग्रे अस्यैव रससूत्रस्य क्रमेण भट्टलोल्लट–श्रीशङ्कुक–भट्टनायक–अभिनवगुप्तादिभिः व्याख्या प्रस्तुता। पार्यन्ते अयं काव्यरसः लोकानुयाय्यपि अलौकिकः, कार्यः अपि न कार्योऽपि, ज्ञाप्योऽपि न ज्ञाप्योऽपि, ज्ञेयोऽपि न ज्ञेयोऽपि च भवतीत्यस्य स्वरूपसिद्धिः काव्यशास्त्रेषु लभ्यते।[7] केनाप्यन्येनायं रसः चमत्काररूपेणैवाङ्गीकृतः।[8] आचार्यः विश्वनाथः रसास्वदनं वेद्यान्तरसंस्पर्शरहितं, ब्रह्मास्वादसहोदरं स्वाकारवदभिन्नं चाङ्गीकरोति।[9] इत्येवमस्य

रसस्वरूपस्य विविधव्याख्यानानि दृग्गोचरतामुपयान्ति। अयं रसः काव्ये अल्पावश्यकतत्त्वं तथैवास्ति तथा रसवती कान्ता।

**कान्तया गुणशालिन्या सर्वालङ्कारयुक्तया।**
**किं फलं काम्यमानस्य यदि न स्याद् रसावहा॥**
**तद्वद्गुणोत्तरं काव्यमलङ्काररसोज्झितम्।**
**नात्यन्तमादृतं प्राज्ञैरापानप्रीतिमात्रदम्॥**[10]

रसस्यैतावन् महत्त्वं काव्यशास्त्रे आचार्यैरनुभूतं यत् कविराजविश्वनाथः स्वकीये साहित्यदर्पणे काव्यं रसमयं वाक्ये स्याद् नान्यथेति स्वीकृतवान्।[11]

तथाप्रसिद्धस्य रसस्य स्वरूपं मालवाधीशः सरस्वतीकण्ठाभरण–शृङ्गारप्रकाशयोः कर्ता भोजदेवः स्वकीये शृङ्गारप्रकाशे किञ्चिद्भिन्नप्रकारेणाभ्यधायि। तन्मते अन्तःकरणधर्मः अभिमानापरपर्यायः अहङ्कारः एव रसरूपतां लभते। स ब्रूते– यथेन्दुसन्निधेर्गण्डकः स्यन्दते, यथार्कसन्निधेस्सूर्यकान्तो ज्वलति, यथा कर्पूरसन्निधेः स्फटिको विलीयते तथा तेभ्यस्तेभ्यः आलम्बनविभावेभ्यस्तत्तदाकार– परिणतेन्द्रियबुद्ध्युपाधियोगिनोऽभिमानिमनसस्ते ते रतिक्रोधशोकादयो भावाः समुत्पद्यन्ते। अर्थात् अभिमानातिरिक्ते मनसि ते रत्यादयो भावा नैव सम्भवन्ति। अभिमानभरिते मनसि एव रसोद्रेकः जायते नान्यत्र। सरस्वतीकण्ठाभरणस्य टीकाकारेण रत्नेश्वरेण और्जित्यालङ्कारव्याख्यानेऽहङ्कारस्य व्याख्यानं सङ्कीर्तितं विद्यते। तन्मते– तात्कालिकनिमित्तोपनिपाते वासनाविकासात् तमोनिर्भेदस्थानेषु सुप्तप्रबुद्ध इव स्थायिभिरसंसृज्यमानः प्रथम–प्रादुर्भूतोऽभिमानोऽहङ्कारः।[12] अयमेवात्मस्थितः अहङ्काराख्यः गुणः शृङ्गारपदवाच्यः भवति। तत्सत्त्वे एव रसिकः अन्यथा नीरसः इति जगति जनानां प्रसिद्धिः।[13]

अयं शृङ्गारप्रकाशः काव्यशास्त्रे नाट्यशास्त्रवत् षड्त्रिंशत्–प्रकाशेषु सुविस्तृतो विद्यते। बहुकालं यावत् ग्रन्थोऽयमनुपलब्धः आसीत्। सर्वप्रथमं पण्डित–वी.राघवन–महोदयेन एतदाधारीकृत्य स्वानुसंधानं 1931 तः 1934 ख्रीष्टाब्दमध्ये कृतम्। तदनन्तरं स एवाचार्यः सम्पूर्णमपि शोधग्रन्थं हारवर्ड ओरिएन्टल सेरिज, हारवर्ड–विश्वविद्यालयं प्रति समर्पितवान्। ततः तस्मादेवास्य मुद्रणं प्रकाशनं च 1978 तमे वर्षे जातम्।[14] अधुना काशिधाम्नः आचार्येण पण्डित–रेवाप्रसादद्विवेदिना सम्पादनपुरस्सरः इन्दिरागाँधीराष्ट्रीयकलाकेन्द्रेण प्रकाशितो वर्तते।

अस्य सुविस्तृतकलेवरे भोजराजेन काव्यशास्त्रीयाणां सर्वेषां तत्त्वानां व्याख्यानं

प्रस्तुतं विद्यते। अस्य शृङ्गारप्रकाशस्य साहित्यप्रकाशोऽप्यभिधानं कृतमस्ति तेनैवाचार्येण। सः अस्य ग्रन्थस्य स्वरूपोद्घाटनं स्वयमेव अस्मिन्नेव शृङ्गारप्रकाशे इथं कृतवानस्ति– यस्मिन्नशेषविद्या-स्थानार्थविभूतयः प्रकाशन्ते। संहत्य स साहित्यप्रकाशः एतादृशो भवति। एतस्मिन्न हि शृङ्गारप्रकाशे सुप्रकाशमेवाशेषशास्त्रार्थसम्पदुपनिषदाम् अखिलकलाकाव्यौचित्यकल्पनारहस्यानां च सन्निवेशो दृश्यते।

शृङ्गारप्रकाशे आचार्येण भोजराजेन रसस्य लक्षणं समुपस्थापितमस्ति। तन्मते शृंगार एवैको रसः वर्तते। यथा वचनेषु तात्पर्यस्य, काव्ये ध्वनेः, अङ्गनायाः वपुषि लावण्यस्य, वल्लभस्य गुणग्रामेषु सौभाग्यस्य विशेषतयास्वादनं भवति तथैव मानवतो जनस्य हृदि शृङ्गार एवास्वादतत्त्वं जायते।

**तात्पर्यमेव वचसि ध्वनिरेव काव्ये सौभाग्यमेव गुणसम्पदि वल्लभस्य।**
**लावण्यमेव वपुषि स्वदतेऽङ्गनाया; शृङ्गारमेव हृदि मानवतो जनस्य॥**[15]

यद्यपि पूर्वाचार्यैः शृङ्गार–वीरादयः अष्टौ काव्यनाट्ययोः रसाः, शान्तश्चापरः काव्यरसः कीर्तितः वर्तते। अन्येनापि केनापि वात्सल्योऽपि रसत्वेन स्वीकृतः वर्तते। एतत् सर्वमपि लौकिकगतानुगतिकत्वमस्ति। केनापि पूर्वाचार्येण एतत् स्वीकृतम्। अत एव परवर्तिभिरपि तदेव प्रतिपादितम्। परं ममायं परिश्रमः तत् गतानुगतिकत्वं निवारयितुं वर्तते इति भोजराजस्याभिमतमस्ति। यथा–

**वीराद्भुतादिषु च येह रसप्रसिद्धिः सिद्धा कुतोऽपि वटयक्षवदाविभाति।**
**लोके गतानुगतिकत्ववशादुपेतामेतां निवर्तयितुमेष परिश्रमो नः॥**[16]

केवलमयं शृङ्गार एव रसनीयतामापादयति। तस्मात् शृङ्गार एव रसपदवीम् अधिरोहति नान्यत्। एष एव रसनाम्नाभिधातुं शक्यते नान्यत्। अत एव शृङ्गार एव रसः।

**शृङ्गार–वीर–करुणाद्भुत–रौद्र–हास्य–बीभत्सवत्सल-भयानक–शान्तनाम्नः।**
**आम्नाशिषुर्दशरसान् सुधियो वयन्तु शृङ्गारमेव रसनाद् रसमामनामः॥**[17]

अस्य रसस्य स्वरूपमस्ति–

**शृङ्गारो हि नाम विशिष्टेष्टदृष्ट–चेष्टाभिव्यञ्जकानाम् आत्मगुणसम्पदा-मुत्कर्षबीजं बुद्धि–सुख–दुःखेच्छा–द्वेष–प्रयत्नसंस्काराद्यतिशयहेतुः आत्मनो अहङ्कारगुणविशेषः सचेतसा रस्यमानो रसः।**[18]

अस्य रसलक्षणस्य एवं पदकृत्यं कर्तुं शक्यते–

* रसः शृङ्गाराख्यः एव इति प्रतिज्ञा।
* अहङ्कारः आत्मनो गुणः वर्तते।
* अहङ्करगुणविशेष एव सचेतसा रस्यमानो भवति।
* विशिष्टेष्टदृष्ट–चेष्टाभिव्यञ्जकानाम् आत्मगुणसम्पदामुत्कर्षबीजं भवति अहङ्कार-गुणविशेषः।
* बुद्धि–सुख–दुःखेच्छा–द्वेष–प्रयत्नसंस्काराद्यतिशयहेतुः भवति अहङ्कारगुणविशेषः इति। समेषामेषां क्रमेण विवेचनम् इत्थं भवितुं शक्नोति–

1. सचेतसा रस्यमानः रसः शृङ्गारनामधेय एव। तेनोच्यते– **रसं त्विह प्रेमाणमेवामनन्ति, सर्वेषामपि हि रत्यादिप्रकर्षाणां रतिप्रियो, रणप्रियो, अमर्षप्रेयः, परिहासप्रिय इति प्रेमण्येव पर्यवसानात्।**[19] यथा शूरस्य अलङ्कारसम्पन्ना अङ्गना तावत् न शोभते यावत् शूरभार्यायाः इव गर्वितशिरष्कः न भवति।

**अलङ्कृताप्यन्वयशीलभूषणैर्न शोभते मां प्रति तावदङ्गना।**
**बिभर्ति यावत् प्रमदा समागमे न शूरभार्यादृतगर्वितं शिरः।।**[20]

2. एषः अहङ्कारः विविधदर्शनेषु भिन्नरूपेण व्याख्यातोऽस्ति। सांख्यदर्शने विशेषरूपेणास्योल्लेखो विद्यते। सांख्यदर्शनस्य द्वितीयाध्याये पञ्चदशसूत्रे **अभिमानोऽहङ्कारः**[21] प्रतिपादितमस्ति। अर्थात् अहङ्कारः अभिमानरूपः भवति। सर्वदर्शनसङ्ग्रहे अस्य प्रतिपादनमस्ति यत् **अहङ्कारतत्त्वमभिमानापरनामधेयं महतो विकृतिः।**[22] अभिमान एव अहङ्कारपदवाच्यः वर्तते। न्यायदर्शने अहङ्कारस्य आश्रयः आत्मेति प्रतिपादितमस्ति। सिद्धान्तमुक्तावल्याः प्रत्यक्षखण्डे पञ्चाशत्तमकारिकायां समुल्लिखितमस्ति–

**प्रवृत्त्याद्यनुमेयोऽयं रथगत्येव सारथिः।**
**अहङ्कारस्याश्रयोऽयं मनोमात्रस्य गोचरः।।**[23]

3. अहङ्कारः अभिमानो वा एव रस्यमानतां भजते। तं विना रस्यमानतैव न सम्भवति। अस्य विवरणं शृङ्गारप्रकाशकारेण विस्तृतं प्रतिपादितमस्ति। तेनोच्यते यत्–

**अप्रातिकूलितया मनसो मुदादेर्यस्संविदोऽनुभवहेतुरिहाभिमानः।**
**ज्ञेयो रसः स रसनीयतयाऽऽत्मशक्तेः रत्यादिभूमनि पुनर्वितथा रसोक्तिः।।**[24]

अर्थात् अभिमानः एव आत्मशक्तेः रसनीयतया तिष्ठति। अत एव स एव

रसरूपेण ज्ञेयः। तन्मते एतेन रूढाहङ्कारता रसस्य पूर्वा कोटिः। तथाहि– यथोर्जस्विन्यपहर्ताहमिति यत्ते चेतसि भयं, न मे खड्गः पराङ्मुखेषु कदाचिदपि प्रहर्तुमुत्सहते इति रूढोऽहङ्कारः प्रतीयते। सैवावन्ती मयात्रैव जन्मनि लब्धेति धिक् ते वृथाप्रतिज्ञो मानपरिग्रह इति, उर्वीविजयाद्यकृत्वा कथं पार्थिवो भवेयमिति, न मयेदृशाः शाखिनः क्वचिदपि दृष्टा इति, अनेन मे द्रौपदी केशेष्वाकृष्टेति, धन्यो मघवा यस्यैतदायुधमिति, सा मे देवी चिन्तामध्यास्त इति, धिक् कौणपाः शोणितमान्त्रभूषणाः पिबन्तीति, अस्ति मे सन्तोषो मनस इति, यथेयं मे प्रिया तथाहमप्यस्या यतो मदनुकूलमेवैषापि चेष्टत इति, मयि धृतायुधे किमायुधान्तरैरिति सर्वत्रैवाहङ्कारः प्रतीयते।[25] इत्येवं तेन बहुषु काव्यवाक्येषु अहङ्कारतायाः विषयं प्रतिपाद्य प्रकथितं यत् अहङ्कारता एव रसस्यानिवार्यतत्त्वं विद्यते। स एव रसरूपतामादधाति।

4. विशिष्टं यत् इष्टं तस्य दर्शनेन या जाता समुत्पन्ना वा चेष्टा तस्याः अभिव्यञ्जमानाम् आत्मगुणानां हर्षशोकक्रोधादीनाम् उत्कर्षस्य अर्थात् आधिक्यस्य बीजं भवति अहङ्कारः।

5. एषः अहङ्कार एवात्मनो गुणानां बुद्धि–सुख–दुःखेच्छा–द्वेष–प्रयत्नसंस्कारादीनाम् आधिक्यस्य कारणं भवति। अस्य सत्त्वे एव एतेषामात्मगुणानां सम्यक् अभिव्यञ्जनं सम्भवति।

एष एव रसः शृङ्गार इति कथ्यते। यतो हि **न ह्यशृङ्गारिणः कश्चिदपि प्रकर्षगामी अप्रकर्षगामी वा भावः सम्भवति। शृङ्गारी हि 'रमते, उत्सहते, हसति, विस्मयते, जुगुप्सते, शोचते, बिभेति, शाम्यति, स्निह्यति, गर्वायते, अभिमन्यते' इति।**[26] तन्मते प्रेम एव सर्वेषां रसानां मूलभूतकारणं भवति। लोके रसिकस्य विभिन्नानि स्वरूपाणि दृश्यन्ते। कोऽपि रतिप्रियः भवति अन्यः हासप्रियः, कोऽपि युद्धप्रियः भवति अन्य शान्तिप्रियः एवं विविधेषु भावेषु सत्स्वपि प्रियता सर्वत्रापेक्ष्यते। एतदेवालक्ष्य तेनापि आचार्येण भोजराजेन प्रियतैव रसस्य कारणत्वेनाङ्गीकृता।

इत्येवं **रसः शृङ्गार** एव। सः एव अभिमानापरपर्यायः अहङ्कारः आस्वद्यमानतां भजते। तस्यैव रस्यमानता सम्भवति। अत एव स एव रसः। परञ्च तस्य अहङ्कारस्य सर्वेषु रसरूपता न संभवति। यः प्रेमसम्पन्नः भवति स एव रसिको भवितुमर्हति। अर्थात् तस्यैवाहङ्कारः रस्यमानतापर्यन्तं तिष्ठति। अन्यथा सर्वे सामाजिकाः विविधभावसम्पन्नास्तु सन्त्येव। परन्तु रसिकत्वोपाधिः कस्यचिदेव। स एव प्रेमगुणसम्पन्नः रसानुभवकर्ता भवितुमर्हति।

शृङ्गारप्रकाशानुगुणं शृङ्गार एव एको रसो वर्तते। यतो हि भरतमुनिनोक्तं **विभानुभावव्यभिचारिसंयोगात् रसनिष्पत्तिः** इति रससूत्रं सार्थकं न घटते। अस्य व्याख्यायामाचार्यैः **स्थायीति** शब्दस्य सन्निवेशो विहितो विद्यते। एष स्थायी रति–शोकादिरूपस्तिष्ठति। एते रत्यादयः ग्लान्यादिवत् भावाः सन्ति। सा एव स्थायी भावः रतिः कदाचित् हास्यादिषु व्यभिचारिवत् जायते। अत एव एते रत्यादयः सर्वेऽपि एकोनपञ्चाशत् भावाः एव न तु स्थायी। अवस्थावशात् सर्वेऽपि व्यभिचारिणः, सर्वेऽपि च स्थायिनस्तिष्ठन्ति। अस्य मते शृङ्गारः रतिप्रभवः न भवति अपितु रत्यादीनामयमेव प्रभवः। **वयं तु मन्यामहे रत्यादीनामयमेव प्रभवः इति। शृङ्गारिणो हि रत्यादयो जायन्ते, नाशृङ्गारिणः। ते तु भाव्यमानत्वात् भावा एव, न रसाः। यावत्संभवं हि भावनया भाव्यमानो भावः एवोच्यते। भावनापथमतीतस्तु रस इति। मनोऽनुकूलेषु हि सुखादिषु आत्मनः सुखानुभवाभिमानो रसः।**[27] अस्य प्रकथनमस्ति यत् यदि कोऽपि कथयेत् यत् अयं शृङ्गारः रत्यादिभिः न व्यज्यते, अपितु आलम्बनविभावादुत्पन्नः रत्यादिः उद्दीपनविभावादिभिः परं प्रकर्षं प्राप्तः रसीभवन् शृङ्गारसंज्ञां प्राप्नोति तदपि न स्वीकारयोग्यम्। यतोहि एते आलम्बनेभ्यः उत्पद्यमानाः रत्यादयः यदि सर्वेषां संभवति तर्हि सर्वं जगत् रसिकं भवितुं शक्नोति परं नास्ति एवम्। यदि कस्यचिदेव भवेत् तदपि द्विधा भवितुम् शक्नोति दृष्टनिमित्तेन अदृष्टनिमित्तेन च। दृष्टनिमित्ते सति रत्यादीनामुत्पत्तिः सर्वासु एव स्वीकर्तव्या, तन्न सम्भवति। अदृष्टनिमित्तमपि द्विविधं भविष्यति– साधारणम् असाधारणं च। साधारणे सति पुनः सर्वस्य रसिकत्वापत्तिः जायते। असाधारणे तु अहङ्कारगुणविशेषं विना न सम्भवति। तद् विवृणोति– **असाधारणं तु प्रत्यगात्मगतानादिवासनानुबन्धिधर्मकार्यं भवितुमर्हति। तं चात्मनोऽहङ्कारगुणविशेषं ब्रूमः। सः शृङ्गारः सोऽभिमानः सः रसः। तत एते रत्यादयो जायन्ते। तैश्चायं प्रकर्षप्राप्तैः सप्तार्चिरर्चिश्चयैरिव प्रकाशमानः शृङ्गारिणामेव स्वदते इति।**[28] अर्थात् अहङ्कार एव रसपदवीं शृङ्गारपदवीं वा लभते। तस्मादेव शृङ्गारात् रत्यादीनां सम्भवः। तैरेव प्रकर्षप्राप्तैः रत्यादिभिः प्रकाशमानः शृङ्गारः रसः शृङ्गारिपुरुषैः आस्वाद्यतामापद्यते। एतस्मात् एक शृङ्गार एव रसः नान्यदिति सिद्ध्यति।

इयदेव वैशिष्ट्यं नवीना विचारसरणिः भोजराजस्य शृङ्गारप्रकाशे विद्यते। अनेन प्रकारेण शृङ्गार एव रसः इति। अस्य सत्त्वे एव कोऽपि रसिकपदवाच्यः। यः

रसिकः तमेव रसोद्बोधः। अत एव कविः विधातारं प्रार्थयति– **अरसिकेषु कवित्वनिवेदनं शिरसि मा लिख मा लिख मा लिख।** अतः रसोद्बोधः कश्चिदेव अहङ्कारसम्पन्नं रसिकम्।

सम्प्रति अयं शृङ्गारप्रकाशः प्रकाशितः वर्तते। परन्तु कुत्रापि विद्यार्थिषु, अध्यापकेषु, गोष्ठीषु, व्याख्यानेषु च अस्य ग्रन्थस्योपरि समुचिता चर्चा न भवति इति खेदजनकम्। सर्वेऽपि लब्धप्रतिष्ठितविद्वांसः केवलं पूर्वतः बहुविधचर्चागतविषयेष्वेव चर्चां कुर्वन्ति। परञ्च यदि अस्य ग्रन्थस्य विषये चर्चा भवेत्, विशिष्टांशेषु व्याख्यानादयः समायोजिताः भवेयुश्चेत् नूनमेव काव्यशास्त्रस्य चिन्तनशैल्याः नव्यमार्गस्य समुद्घाटनं जायेत। अस्य आचार्यस्य भोजराजस्य कृतेः प्रचारः प्रसारश्च साहित्यशास्त्रसमाजे भवेत्। इति दिक्।

***

**सन्दर्भाः–**


1. रसो वै रसः। रस ह्येवायं लब्ध्वा आनन्दीभवति। तै. उपनिषद्, ब्रह्मानन्दवल्ली, सप्तम-अनुवाक्
2. यो वः शिवतमो रसः। ऋग्वेद 10.9.2
3. रसश्च रसयितव्यम्। प्रश्नोपनिषद् 4.8
4. गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः। न्यायसूत्रम् 1.1.14
5. न हि रसादृते कश्चिद् अर्थः प्रतिपद्यते। नाट्यशास्त्रम्, भाग-1, पृ.288
6. विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः। नाट्यशास्त्रम् षष्ठाध्यायः
7. काव्यप्रकाशः, चतुर्थप्रकाशः, रससूत्रव्याख्या
8. रसे सारश्चमत्कारः। साहित्यदर्पणः 3.3 वृत्तिः।
9. वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः। लोकोत्तरचमत्कारप्राणः कैश्चित्प्रमातृभिः।।
   स्वकारवदभिवन्नत्वेनायमास्वाद्यते रसः।। सा.द. 3.2-9
10. साहित्यमीमांसायाम्, (षष्ठप्रकरणम्, पृ.सं.65) सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन 1984 तमे ख्रिस्ताब्दे प्रकाशितम्।
11. साहित्यदर्पणः- वाक्यं रसात्मकं काव्यम्, प्रथम परिच्छेदः
12. सरस्वतीकण्ठाभरणम्, 1.109
13. आत्मस्थितं गुणविशेषमहङ्कृतस्य शृङ्गारमाहुरिह जीवितमात्मयोनेः।

तस्यात्मशक्तिरसनीयतया रसत्वं युक्तस्य येन रसिकोऽयमिति प्रवादः। शृङ्गारप्रकाशः, प्रथमप्रकाशः श्लोक-3 (पं.रेवाप्रसादद्विवेदिसम्पादितसंस्करणे)

14. शृङ्गारप्रकाशः पं.रेवाप्रसादद्विवेदिसम्पादितसंस्करणे, पृ.45
15. शृङ्गारप्रकाशः- प्रथमप्रकाशः, पृ.2, श्लोक-5
16. शृङ्गारप्रकाशः- प्रथमप्रकाशः, पृ.2, श्लोक-7
17. शृङ्गारप्रकाशः- प्रथमप्रकाशः, पृ.2, श्लोक-6
18. शृङ्गारप्रकाशः- एकादशप्रकाशः, पृ.614
19. शृङ्गारप्रकाशः- एकादशप्रकाशः, पृ.613
20. शृङ्गारप्रकाशः- एकादशप्रकाशः, पृ.613
21. षड्दर्शनानि Vaidic Literature Callection, Maharshi University Management. p.28)
22. सर्वदर्शनसंग्रहे- साङ्ख्यदर्शने
23. सिद्धान्तमुक्तावली- प्रत्यक्षखण्ड, पृ.231
24. शृङ्गारप्रकाशः- एकादशप्रकाशः, पृ.636
25. शृङ्गारप्रकाशः- एकादशप्रकाशः, पृ.636
26. शृङ्गारप्रकाशः- एकादशप्रकाशः, पृ.633
27. शृङ्गारप्रकाशः- एकादशप्रकाशः, पृ.616
28. शृङ्गारप्रकाशः- एकादशप्रकाशः, पृ.616

***

# कर्तृत्वविचारः

**रामबाबू पाण्डेयः**

सुबर्थः कारकार्थ एव इति अर्थान्तरम्। तच्च कर्तृ–कर्म–करण–सम्प्रदान–अपादानसम्बन्ध–अधिकरणभेदात् सप्तविधम्। किन्तु नवीनाः वैयाकरणाः क्रियाविषयताश्रयत्वात् सम्बन्धस्य कारकत्वं न स्वीकुर्वन्ति। पाणिनिमतानुसारेण 'सम्बन्धः' शेषकारकनाम्नाऽभिधीयते, शेषे च कारके षष्ठी भवति। उक्तञ्च नागेशभट्टेन परमलघुमञ्जूषायाम्–

**कर्ता कर्म च करणं सम्प्रदानं तथैव च।**
**अपादानाधिकरणमित्याहुः कारकाणि षट्।।**[1]

तत्र क्रियानिष्पादकत्वं क्रियान्वयित्वं वा कारकत्वम्। क्रियान्वयित्वस्य अभावात् षष्ठ्यर्थस्योपपदविभक्त्यर्थस्य च न कारकत्वम्। सम्बोधनस्य चापि कर्त्रा सह सम्बन्धत्वात् कारकाणि षड् एव।

अथेदानीं 'कर्तृत्वविचारः' इति विषयोपरि चर्चा क्रियते। कर्तुः स्वरूपं प्रतिपादयता भगवता पाणिनिना सूत्रितम्–'**स्वतन्त्रः कर्ता**'[2] इति। तस्यायमर्थः– क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्तृसंज्ञको भवति। तत्र स्वातन्त्र्येण इत्यत्र स्वतन्त्रशब्दः प्रधानवाची। स्व आत्मा तन्त्रं प्रधानं यस्येति व्युत्पत्तेः। तथा चोक्तं कैयटेन '**स्वशब्द आत्मवाची स्व आत्मा तन्त्रं प्रधानं यस्य स्वतन्त्र उच्यते।**'[3]

महाभाष्यकृताऽपि स्वातन्त्र्यस्य प्राधान्यमेवार्थः कृतः, अभिहितञ्च– '**अयं तन्त्रशब्दः अस्त्येव विताने वर्तते। तद्यथा आस्तीर्णं तन्त्रम्, प्रोतं तन्त्रमिति। वितानमिति गम्यते। अस्ति प्राधान्ये वर्तते। तद्यथा स्वतन्त्रोऽसौ ब्राह्मण इत्युच्यते। स्वं प्रधान इति गम्यते। तद् यः प्रधाने वर्तते तन्त्रशब्दः तस्येदं ग्रहणम्।**'[4]

स्वातन्त्र्यञ्च– प्रधानीभूतधात्वर्थाव्यापाराश्रयत्वम्। ननु कर्मणि प्रत्यये 'देवदत्तेन ओदनः पच्यते' इत्यादौ देवदत्तनिष्ठव्यापारस्य नव्यमते प्राधान्याभावः। यतोहि नव्यानां मते तत्र फलविशेष्यक एव बोधः। अत एव नागेशेनोक्तम्– **'कर्माख्याते तु चैत्रेण ग्रामो गम्यते इत्यत्र चैत्रकर्तृकव्यापारजन्य एकत्वावच्छिन्न-ग्रामाभिन्नकर्मनिष्ठः संयोग इति बोधः।'**[5] एवञ्च तत्र देवदत्तस्य प्रधानीभूतधात्वर्था-श्रयत्वाभावात् कर्तृत्वं न स्यादित्युच्यते चेत्, तर्हि तत्र देवदत्तस्य कर्तृत्वसिद्धये उक्त-लक्षणे कर्तृप्रत्ययसमभिव्याहारे इत्यपि विशेषणं देयम्। तथा चोक्तं नागेशेन– **स्वातन्त्र्यञ्च–कर्तृप्रत्ययसमभिव्याहारे प्रधानीभूतधात्वर्थाश्रयत्वम्। पक्वस्तण्डुलो देवदत्तेन इत्यत्र फलस्य प्राधान्येऽपि देवदत्तस्य कर्तृत्वसिद्धये कर्तृप्रत्यय-समभिव्याहारे इति।**[6]

नन्वेवमपि 'पाचयत्योदनं देवदत्तेन यज्ञदत्तः' इत्यादौ प्रयोज्यस्य देवदत्तादेः कर्तृत्वं न स्यात्। तथाहि णिजन्तस्थले णिच्–प्रत्ययस्य द्योतकत्वेन पाचि इत्यत्र धातोः विक्लित्त्यनुकूल-व्यापारानुकूलव्यापार एवार्थः। एवञ्च प्रथमप्रयोज्यव्यापारस्य द्वितीय-व्यापारनिष्ठविशेष्यतानिरूपित–प्रकारताश्रयत्वेन प्रकारताऽसमानाधिकरणविशेष्यतारूप-मुख्यविशेष्यताभावात् मुख्यविशेष्यता-श्रयत्वरूपप्रधानत्वस्य प्रयोज्यव्यापारेऽसत्त्वेन प्रधानीभूतधात्वर्थाश्रयत्वं देवदत्तादेः प्रयोज्यस्य न स्यात्। उक्तञ्च भगवता पतञ्जलिना– **स्वतन्त्रस्य कर्तृसंज्ञायां हेतुमत्युपसंख्यानं कर्त्तव्यम्। पाचत्योदनं देवदत्तो यज्ञदत्तेनेति। किं पुनः कारणं न सिद्ध्यति? अस्वतन्त्रत्वात्।**[7]

व्याख्यातञ्च तत्रैव कैयटेन– **यथा कर्तृसन्निधौ करणादीनां नास्ति स्वातन्त्र्यं, तथा प्रयोजकसन्निधौ प्रयोज्यस्य पारतन्त्र्यात्, स्वातन्त्र्याभावात् कर्तृसंज्ञाया अप्रसंगात्, पाचत्योदनं देवदत्तेनेति कर्तृतृतीया न प्राप्नोति।**[8] एवञ्च णिजन्तस्थले कथं देवदत्तादीनां कर्तृत्वमिति चेत्? अत्रोच्यते णिजन्तस्थले णिच्–प्रत्ययो वाचक एव, न तु द्योतकः। एवञ्च णिजन्तप्रकृतिभूतः यः पच् धातुः तद्वाच्यविक्लित्त्यनुकूलव्यापारस्य प्राधान्यात् तदाश्रयत्वेन देवदत्तादेः प्रयोज्यस्य कर्तृसंज्ञा, पाचि–निरूपित कर्तृत्वञ्च प्रयोजकस्येति न काप्यनुपपत्तिः। अत एवोक्तं नागेशेन– **णिचस्तु वाचकत्वमेव अतस्तत्र ण्यन्तधातु–तत्प्रकृतिधातु–तदुभयवाच्यव्यापारयोः स्वार्थं प्रति प्राधान्यात् देवदत्तेन यज्ञदत्तः पाचयति इत्यादौ प्रयोज्यव्यापाराश्रयस्यापि कर्तृत्वसिद्धिः। द्योतकत्वे तु नैतत् सिध्येत्।**[9]

प्रयोज्यव्यापाराश्रयस्य कर्तृत्वाभावेऽपि करणतृतीयैव निर्वाह इति तु न युक्तम्,

प्रयोज्यस्य करणत्वविवक्षायामपि 'देवदत्तः शतेन बन्धयतीत्यादौ **'अकर्तर्यृणे पञ्चमी'**[10] इत्यनेन प्राप्तां पञ्चमीं बाधित्वा कर्तृत्वप्रयुक्ततृतीयार्थं कर्तृसंज्ञायाः आवश्यकत्वात्।

कर्तृत्वप्रयोजकं स्वातन्त्र्यञ्च विवक्षाधीनम्। अतः स्थाली पचति, काष्ठानि पचन्ति, इत्यादौ स्थाल्यादीनां वस्तुतः स्वातन्त्र्याभावेऽपि स्वातन्त्र्येण विवक्षितत्वात् कर्तृसंज्ञा। अत एव 'स्वतन्त्रः कर्ता' इति सूत्रस्य वृत्तौ विवक्षितोऽर्थः कर्ता स्यात् इत्युक्तम्।

कर्मणः कर्तृत्वविवक्षायामोदनः स्वयमेव पच्यते इत्यादौ कर्मकर्तरि प्रधानीभूतधात्वर्थाश्रयत्वेन कर्तृत्वं बोध्यम्। अथवा स्वेच्छाधीनप्रवृत्तिनिवृत्तिकत्वं वा स्वातन्त्र्यम्। कर्तुः प्रवृत्तिनिवृत्ती स्वेच्छाधीने भवतः। अन्येषां कारकाणान्तु प्रवृत्तिनिवृत्ती कर्त्रपेक्षया। अत एव सर्वेषां कारकाणां सामान्येन क्रियोत्पादकत्वेऽपि कर्तुरेव स्वातन्त्र्यम्, न त्वन्येषां कारकाणाम्। तथा च कर्तरि किं कृतं प्राधान्यमित्यपेक्षायामुक्तं भाष्ये **'कथं पुनर्ज्ञायते कर्ता प्रधानमिति? यत्सर्वेषु साधनेषु सन्निहितेषु कर्ता प्रवर्तयिता भवति।'**[11] व्याख्यातञ्च कैयटेनाऽपि 'तदधीनप्रवृत्तिनिवृत्तित्वात्करणादीनां तस्य च प्रागन्यतः शक्तिलाभात्प्रतिनिध्यदर्शनात् करणाद्यभावेऽप्यास्ते शेते इत्यादौ केवलस्य कर्तुर्दर्शनात् कर्तृरहितानां करणादीनामदर्शनात् प्राधान्यं कर्तुः'[12] इति।

भर्तृहरिणा कर्तुः स्वातन्त्र्येऽनेकाः युक्तयः उपन्यस्ताः सन्ति। तद्यथा कर्त्रा सर्वकारकापेक्षया पूर्वमेव शक्तिर्लभ्यते। कर्त्ताऽन्यानि कारकाणि न्यग्भावयति। अन्येषां कारकाणाञ्च प्रवृत्तिनिवृत्ती कारकाधीने भवतः। कर्तुः कोऽपि प्रतिनिधिर्न भवत्येषां कारकाणाञ्च प्रतिनिधयः भवन्ति, सत्यामावश्यकतायां तेषां स्थाने प्रतिनिधयः उपस्थाप्यन्ते। एवञ्चान्यैरपि कारणैः कर्तुरन्यकारकापेक्षया स्वातन्त्र्यं प्रतिपादितम्। उक्तञ्च तैः–

**प्रागन्यतः शक्तिलाभात् न्यग्भावापादानादपि।**
**तदधीनं प्रवृत्तित्वात् प्रवृत्तानां निवर्तनात्॥**
**अदृष्टत्वात् प्रतिनिधेः प्रविवेके च दर्शनात्।**
**आरादप्युपकारित्वे स्वातन्त्र्यं कर्तुरिष्यते॥**[13]

तस्मादन्येषां कारकाणां कर्त्रधीनप्रवृत्तिनिवृत्तिकत्वेन स्वेच्छाधीनप्रवृत्तिनिवृत्तिकत्वरूपस्वातन्त्र्यस्वीकारे नातिव्याप्तिः।

न चोक्तरूपस्वातन्त्र्यस्वीकारे णिजन्तस्थले 'पाचयत्योदनं देवदत्तेन यज्ञदत्तः' इत्यादौ प्रयोज्यकर्तुः स्वेच्छाधीनप्रवृत्तिनिवृत्तिकत्वाभावादव्याप्तिः स्यादिति वाच्यम्,

स्वार्थसत्त्व एव प्रवृत्तिः, तदभावे चाप्रवृत्तिरिति स्वीकारेणादोषात्। अत एव–

**निमित्तेभ्यः प्रवर्तन्ते सर्व एव स्वभूतये।**

**अभिप्रायानुरोधेऽपि स्वार्थस्यैव प्रसिद्धये॥**

इति अभियुक्तोक्तं संगच्छते। तच्च प्रवृत्तिनिवृत्तिकत्वरूपं स्वातन्त्र्यमारोपितमनारोपितं वेत्यत्र न कश्चनाग्रहः। अतः स्थाली पचति, काष्ठानि पचन्ति इत्यादौ स्थाल्यादौ तस्यारोपात्, कर्तृसंज्ञा भविष्यतीति न कश्चन दोषः पक्षेऽस्मिन्। तथा चोक्तम्– 'स्वेच्छाधीनप्रवृत्तिनिवृत्तिकत्वं वा स्वातन्त्र्यम्। तच्च प्रयोजकसन्निधानेऽपि प्रयोज्यस्य, तत्सन्निधानेऽपि स्वार्थसत्त्वे प्रवृत्तेस्तदभावेऽप्रवृत्तेश्च। निमित्तेभ्यः प्रवर्तन्ते सर्व एव स्वभूतये। अभिप्रायानुरोधोऽपि स्वार्थस्यैव प्रसिद्धये। तत्त्वारोपितमनारोपितं च संज्ञा निमित्तम्। आद्यं स्थाल्यादौ। अन्त्यं पुरुषे इति।'[14]

कौण्डभट्टैः कर्तुः भेदत्रयं स्वीकृतम्। उक्तञ्च–**'अयं च त्रिविधः– शुद्धः, प्रयोजको हेतुः, कर्मकर्ता च।'**[15] तद्यथा– देवदत्तः पचतीत्यत्र देवदत्तः शुद्धकर्ता, देवदत्तः पाचयतीत्यत्र देवदत्तः प्रयोजक कर्ता, देवदत्तो यज्ञदत्तं गमयतीत्यत्र यज्ञदत्तादेः कर्मकर्तृत्वञ्च।

यद्यपि तत्र यज्ञदत्तादीनां **'गतिबुद्धिप्रत्यवसान...'**[16] इति सूत्रेण कर्मसंज्ञा भवति, तया संज्ञया कर्तृसंज्ञायाः बाधोऽपि भवति, किन्तु णिच्प्रकृतिधात्वर्थव्यापाराश्रयत्वेन तस्य कर्तृत्व-लक्षणाक्रान्तत्वात् यज्ञदत्तः कर्तृकर्तेति व्यवहारः।

वस्तुतस्तु मुख्यरूपेण कर्तुः द्वैविध्यमेव। तत्र प्रथमः स्वतन्त्रः कर्ता, यः पाणिनिना 'स्वतन्त्रः कर्ता' इति सूत्रेण प्रतिपादितः। द्वितीयस्तु हेतुकर्ता यः **'तत्प्रयोजको हेतुः'**[17] इति सूत्रेण प्रतिपादितः। प्रयोजकहेतुकर्तुः स्वरूपं प्रतिपादयता भर्तृहरिणा उक्तम्–

**प्रेषणाध्येषणे कुर्वन् तत्समर्थानिवाचरन्।**
**कर्तैव विहितां शास्त्रे हेतुसंज्ञां प्रपद्यते॥**[18]

तत्र स्वतन्त्रः कर्ता त्रिविधः– अभिहितोऽनभिहितः, कर्मकर्ता च। तत्र प्रथमस्तावत् देवदत्तः पचति, द्वितीयः देवत्तेन गम्यते, तृतीयस्तु तत्र भवति यत्र कर्मणः एव कर्तृत्वेन विवक्षा भवति– यथा ओदनः पच्यत इत्यत्र ओदनः कर्मकर्ता। प्रयोजकहेतुकर्ता च द्विविधः चेतनरूपोऽचेतनरूपश्च तद्यथा पाचयत्योदनं गोपेन कृष्णः, भिक्षावासयति इति क्रमेणोदाहरणं बोद्धव्यम्।

नैयायिकास्तु कृत्याश्रयत्वं कर्तृत्वं स्वीकुर्वन्ति। कृत्याश्रयत्वञ्च समवायेनैव। एवञ्च 'घटः पचति' इत्यादौ कालिकादिसम्बन्धेन घटे कृतेर्विद्यमानत्वेऽपि न कर्तृत्वम्, तत्र युक्तम्– कृतेश्चेतन एव विद्यमानत्वेनाचेतनानां 'रथो गच्छति' इत्यादौ रथादीनां कर्तृत्वं न स्यात्, कृत्याश्रयत्वाभावात्। तथा चोक्तं कौण्डभट्टैः– **कारकचक्रप्रयोक्तृत्वं कृत्याश्रयत्वं वा दण्डः करोति इत्यत्राव्याप्तम्।**[19]

***

**सन्दर्भाः–**


1. परमलघुमञ्जूषा कारकनिरूपणम्
2. पा. अ. 1.4.54
3. महा. भा. प्र. 1.4.54
4. महा. भा. 1.4.54
5. परमलघुमञ्जूषा कारकनिरूपणम्, पृ.227
6. ल.श.शे. कारकप्रकरणम्
7. महा. भा. 1.4.54
8. महा. भा. प्रदीपः 1.4.54
9. ल.श.शे. कारकप्रकरणम्
10. पा. सू. 2.3.24
11. महा. भा. 1.4.23
12. महा. भा. प्रदीपः 1.4.23
13. वा. प. साधनसमुद्देशः 3.101.102
14. टिप्पणी सि.कौ. कारकप्रकरणम्
15. वै. भू. सा. सुबर्थनिर्णयः
16. पा. सू. 1.4.52
17. पा. सू. 1.4.55
18. वा. प. साधनसमुद्देशः 125
19. वै. भू. सा. सुबर्थनिर्णयः


***

## अरण्यकाण्डम्

### शूर्पणखादृष्ट्या व्यर्थः नरपतिः कीदृशः?

(i) ग्राम्येषु भोगेषु सक्तः,
कामवृत्तः,
लुब्धः।
(अतः श्मशानाग्निरिव सः प्रजाभिः न बहु मन्यते) 33/3

(ii) यः काले स्वयं कार्याणि नानुतिष्ठति।
सः तैः कार्यैः राज्येन सह विनश्यति। 33/4

(iii) अयुक्तचारं,
दुर्दर्शम्,
अस्वाधीनं
(नरपतिं नदीपङ्कमिव द्विपाः इव नराः वर्जयन्ति) 33/5

(iv) ये नराधिपाः अस्वाधीनं विषयं न रक्षन्ति,
ते वृद्ध्या न प्रकाशन्ते (सागरे गिरयो यथा) 33/6

(v) अयुक्तचारः
चपलः
बालस्वभावः
बुद्धिहीनः (नरपतिः व्यर्थः) 33/7-8

(vi) येषां नरेन्द्राणां
चाराः अस्वाधीनाः
कोशः,नयश्च अस्वाधीनः (ते प्राकृतैः जनैः समाः) 33/9

(vii) शुष्ककाष्ठैः, लोष्ठैः पांसुभिश्च कार्यं भवेत्
किन्तु स्थानात् परिभ्रष्टैः वसुधाधिपैः कार्यं न स्यात्। 33/18

(viii) यथा वासः उपभुक्तं, यथा मृदिताः स्रजः (निरर्थकम्)
तथा राज्यात् परिभ्रष्टः समर्थोऽपि नृपः निरर्थकः। 33/10

(ix) कामवृत्तः
दुःशीलः
पापमन्त्रितः
दुर्मतिः (राजा राष्ट्रे स्वजनम् आत्मानं च हन्ति)। 37/7

**शूर्पणखादृष्ट्या उत्तमाः नराधिपाः कीदृशाः?**
ये दूरस्थान् सर्वान् अर्थान् चारेण पश्यन्ति,
अतः **चारचक्षुषः** राजानः इत्युच्यते। 33/10

# संस्कृते वानस्पतिकचेतना 'प्रेमरहस्यं' च

**रत्नमोहन झा**

भारतीया संस्कृतिः सम्पूर्णतया वेदानुप्राणिता वर्तते। वैदिकऋषयः सततं चराचरजगतः कल्याणार्थं चिन्तनम् अकुर्वन्। वैदिकमूल्याधारेण प्रवर्तमाने अस्माकं जीवने प्रकृतेः महत्त्वपूर्णं स्थानं विद्यते। प्रकृतिः मानवस्य जीवनसङ्गिनी वर्तते। प्रकृतिं विना कस्याचिदपि जीवस्य अस्तित्वं नैव सम्भवति। तस्मादेव अस्माकं पूर्वजाः मनसा वाचा कर्मणा च अस्याः संरक्षणार्थं संवर्धनार्थं च समर्पिताः आसन्। साम्प्रतं पर्यावरणसंरक्षणविषये महती परिचर्चा श्रूयते। वैश्विकस्तरे सर्वेऽपि अस्य संरक्षणार्थं चिन्तिताः दृश्यन्ते।

अस्माकं संस्कृतौ प्रकृतिः सजीवा सचेतना च वर्तते। प्रकृतिरिति कथनेन पृथिवी पर्वतः समुद्रः नदी वन्यप्राणिनः खगाः सरीसृपाः वनस्पतयश्च गृह्यन्ते। प्रकृतौ विद्यमानानि सर्वाणि तत्त्वानि सम्भूय पर्यावरणं स्वच्छं सुन्दरं सुदृढं च कुर्वन्ति। भारतीयपरम्परायाः अध्ययनेन ज्ञायते यदस्माकं पूर्वजाः आवैदिककालात् प्रकृतिसंरक्षणार्थं दत्तावधानाः सन्ति। अत्र संस्कृते वानस्पतिकचेतनायाः संक्षिप्तमुल्लेखपुरस्सरं प्रेमरहस्यमित्यत्र श्रीमता ठाकुरमहाशयेन प्रकटिता वानस्पतिकचेतना निरूप्यते।

व्युत्पत्तिदृष्ट्या प्रकृतिशब्दः 'प्र' उपसर्गपूर्वकं 'डुकृञ्' करणे धातोः 'क्तिन्' प्रत्यये कृते सिद्ध्यति। स्वभावार्थे निसर्गार्थे चापि अस्य पदस्य प्रयोगः दृश्यते। साङ्ख्यदर्शनाधारेण कस्यचित् पदार्थस्य प्राणिनः वा विशिष्टः भौतिकः सारभूतः सहजः स्वाभाविकश्च मौलिकः गुणः प्रकृतित्वेनोच्यते। प्रकृतौ ईषदपि परिवर्तनं विकारः वा कथमपि नैव समुद्भवति।[1] उदाहरणार्थं जन्म मरणं च जीवानां प्रकृतिः। अनयोः किञ्चिन्मात्रमपि परिवर्तनं नैव सम्भवति–

**जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।**[2]

वेदान्तदर्शने प्रकृतिः परमात्मनः मूर्तिमतीच्छाशक्तित्वेन निरूपिता वर्तते। मायायाः रूपान्तरत्वेनापीयं निगदिता।[3]

विश्वस्यास्य सर्वेषां कारणाानां कार्याणां च नियामिका सञ्चालिका च शक्तिः यस्यां समस्ताः जीवाः पदार्थाश्च विकसन्ति नश्यन्ति च, प्रकृतिरेव वर्तते। सम्पूर्णं दृश्यमानं जगत् यस्मिन् मानवः पशुः पक्षी पर्वतः नदी वनस्पतिश्च मौलिकरूपेण दृश्यते, प्रकृतिरेव विद्यते। मानवस्य सर्वाः आकाङ्क्षाः प्रवृत्तयः वासनाश्च प्रकृतौ अन्तर्भूताः सन्ति। आभिः वशीभूतः मानवः सर्वविधक्रियाः विधाय उत्कर्षम् अपकर्षं वा विन्दते।

सृष्टेः आदिकालादेव प्रकृत्या सह मानवस्य समवायसम्बन्धः विद्यते। विश्वस्मिन् विश्वे समग्रमपि साहित्यं प्रकृतेः रमणीयाञ्चलस्य स्निग्धच्छायायामेव सृष्टम्। वैदिकसाहित्यं तथ्यमिदं सप्रमाणं पुष्णाति। मानवस्य हृद्गतभावस्य प्राबल्येन प्रकृत्या सह तादात्म्यसम्बन्धः भवति। प्रकृतेः संवेदनशीलरूपं सर्वेषु साहित्येषु अवलोक्यते। मानवस्य सुखदुःखयोः सहचरी भूत्वा प्रकृतिः तद्रूपा भवति। प्रातःकालीनः सुगन्धितः मादकः वायुः, नीडेषु खगसमूहस्य मृदुकलरवः, उषःकालस्य हेममयं वसनं, कलिकासु तुषारकणिकानां चकासमानाः मणिमालाः, नदीनां कलकलनिनादिताम्बुराशिः, पुष्पाणाम् तीक्ष्णसुरभिः, अलियूथस्य गुञ्जायमानं श्रुतिसुखदं मधुरं सङ्गीतं, भगवतः भास्करस्य रजतकिरणैः मृदुचुम्बनेन हिमाच्छादितस्य गिरिरराजस्य इन्द्रधनुष्की शोभा च न केवलं संयोगिनः सहृदयान् आह्लादयति अपितु वियोगिजनान् वृश्चिकदंश इव व्याकुलीकरोति। इष्टव्यक्तेः संयोगावस्थायां प्रकृतिः निकुञ्जायते, वियोगावस्थायां च प्राणघातिनी भवति। सुखदशायां यः मेघः सुखयति, स एव वियोगावस्थायां पीडयति। मृगया केलिक्रीडा वनविहारः तपोभूमिः कृषिकर्म इत्यादिभिः सह सर्वदा अस्माकं अविच्छिन्नः सम्बन्धः वर्तते। प्रकृतिरपि सातत्येन स्निग्धे सुखदे च क्रोडे अस्मान् लालयति। अनादिकालात् इदानीं यावज्जीवमात्रस्य कृते आश्रयप्रदात्री प्रकृतिरेव विद्यते। भावुकानां सुविज्ञानां च चिरसहचरीयं युगयुगान्तरेभ्यः अस्मज्जीवने विविधरूपेण समाविष्टा वर्तते।

निखिलायाः सृष्टेः मूले विधातुः सर्वोत्कृष्टा रचना वर्तते प्रकृतिः। पृथ्वी जलम् आकाशश्च अस्याः सृष्टेः परिणामत्वेन वर्तन्ते। सौरमण्डले विद्यमानेषु ग्रहोपग्रहेषु केवलं पृथिव्यामेव जीवनं सम्भवति, यतः अत्रैव जीवनस्य पारिस्थितिकतन्त्रं (Ecological order) समत्वं धारयति। अत एव ऋषिः उद्घोषयति– "माता भूमिः पुत्रोऽहं पृथिव्याः"[4]

प्रकृतेः बाह्यरूपं यावत् कमनीयं मानवोपकारकं च वर्तते ततोप्यधिकं शक्तियुतं क्षमं च तस्याः बाह्यरूपं विद्यते। कविभिरियं प्रकृतिः आलम्बनत्वेन उद्दीपनत्वेन

सुकोमलत्वेन कठोरत्वेन सहायकत्वेन सन्देशवाहकत्वेन सेवकत्वेन च स्थानानुगुणं चित्रिता वर्तते।

**आलम्बनरूपा प्रकृतिः—**कविः प्रकृतेः दृश्यं स्वरूपं प्रस्तूय तस्याः तथ्याङ्कनस्य यत्र आनन्दम् अनुभवति तत्र इयम् आलम्बनरूपं धारयति।

**उद्दीपिका प्रकृतिः—**प्राकृतिकसुषमां विलोक्य मानवहृदये सहजतया विविधभावाः प्रस्फुटन्ति। नैसर्गिकान्युपादानानि सुखात्मकानि अपि भवन्ति दुःखात्मकानि अपि। प्रकृतिः यत्र रत्युत्साहक्रोधजुगुप्सादिमानवीयभावान् उद्दीपयति तत्र सा उद्दीपनरूपं विदधाति।

**सुकोमला प्रकृतिः—**प्रकृतेः क्वचित् सुकोमलं रूपं क्वचिच्च अत्यन्तं विकरालं रूपं दृश्यते। काव्यस्रष्टुः कृतिषु प्रकृतेः नन्दनकाननस्य विलासः अद्भुतमेव वर्तते। अस्याः रमणीयता चिरपुरातनी सत्यपि नित्यनूतना एव तिष्ठति। कविः स्वकीयकौशलेन आकर्षकरूपम् अस्यै प्रयच्छति।

**सहायिका प्रकृतिः—**प्रकृतिः काले काले अस्माकं साहाय्यं विधाय अस्मान् सत्कर्मणि प्रेरयति। यत्र इयं मानवस्य साहाय्यमाचरति तत्र अस्याः सहायिकारूपं भवति। शकुन्तलायाः पतिगृहप्रस्थानसमये वृक्षैः तस्यै प्रदत्तं विविधवस्त्रभूषणादिकं प्रकृतेः सहायिकारूपं प्रस्तौति।[5]

**सन्देशवाहिका प्रकृतिः—** प्राकृतिकतत्त्वानि दूतीकृत्य सन्देशप्रेषणस्य परम्परा प्रायेण दर्शनसाहित्ये प्राप्यते। कविः प्रकृत्या प्रेरितः सन् मेघं सन्देशवाहकं विधाय नवं काव्यम् असृजत्। अस्मिन् मेघः यक्षपत्न्यै सन्देशं प्रदाय तस्याः जीवनम् अरक्षत्–

**नन्वात्मानं बहु विगणयन्नात्मनैवावलम्बे**
**तत्कल्याणि त्वमपि नितरां मा गमः कातरत्वम्।**
**कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा**
**नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण॥**[6]

**सेविका प्रकृतिः—**विविधैः प्रकारैः मानवजातेः सेवां विदधाति प्रकृतिः। मेघः वृष्ट्या सेवां करोति। शीतलः वायुप्रवाहः क्लान्तान् मानवान् प्रसादयति। वृषभाश्वगोगजादिपशवः हंसमयूरशुककपोतबलाकादिपक्षिणश्च प्रत्यक्षं मानवस्य सेवां कुर्वन्ति। सस्यम् अस्मभ्यम् आहारं, वनस्पतयश्च फलं पुष्पं छायां काष्ठं च ददति। रत्नाकरः रत्नदानेन, पर्वताश्च ओषधिं प्रदाय मानवानां सेवां विदधति।

प्रकृतेः स्वाभाविकसुषमा मानवाय न केवलं स्वच्छं वातावरणं प्रददाति अपितु स्वस्थं शरीरं प्रदाय प्रखरप्रज्ञायाः विकासमपि साधयति। तेनैव स्वस्थं चिन्तनं सम्भवति, मानवप्रवृत्तयश्च लोककल्याणमार्गे अग्रे सरन्ति। प्रकृतिः सृष्टेः च संरक्षणार्थं वेदवाङ्मये उच्यते–

**आयने ते परायणे दूर्वा रोहन्तु पुष्पिणी।**
**उत्सो वा तत्र जायतां ह्रदां वा पुण्डरीकवान्।।**[7]

मानवः पर्यावरणं प्रति तदानीमेव जागरूकः भविष्यति यदा तस्य मानसपटले कृतकतायाः स्पप्रलोकः नोदीयात्, सः प्रकृतेः जीवनदायिनीं शक्तिं चानुभवेत्। मानवः यदि प्रकृत्या सह विध्वंसकारकं नूतनं प्रयोगमकृत्वा अस्याः सौन्दर्यं यथावत् स्थापयितुं प्रयतेत तर्हि महान् उपकारः स्यात्। प्रकृतिः स्वयमेव आत्मसंरक्षणे क्षमा वर्तते। परन्तु मानवः स्वकीयमहत्त्वाकाङ्क्षाकारणात् नित्यं नवनवं प्रयोगं विधाय प्रकृतेः सौन्दर्यं विनाशयति।

कवेः कुशाग्रमेधा तत्क्षणमेव तत्त्वान्वेषणं कुर्वती सहृदयस्य प्रसुप्तभावान् जागरयति। सूर्योदयः स्यात् चन्द्रोदयः वा, सूर्यास्तः भवेत् चन्द्रास्तः वा, कमलं विकसेत् कुमुदिनी वा, चक्रवाकः प्रसन्नः स्याद् उत उलूकः, इमानि सर्वाणि प्राकृतिक–उपादानानि तस्य अन्वेषिकायै अध्यवसायिन्यै बुद्ध्यै सततम् आलम्बनं भवति। एतेषामाश्रयेणैव कविः काव्यरचनावर्त्मनि तीव्रवेगेन प्रयाति।[8]

साहित्येन सह वनस्पतीनाम् अविनाभावसम्बन्धः विद्यते। ऋग्वेदानुसारेण वनस्पतौ औषधीयगुणाः भवन्ति। इमाः माता इव विश्वं रक्षन्ति– **औषधीरीति मातास्तद वो देवीरूप ब्रुवे।**[9] तत्र अश्वत्थवृक्षः अत्यन्तं महत्त्वमावहति। वैदिकऋषीणां कृते अयम् अतीव पूज्यः पूतश्च वर्तते। ऋषयः सादरं वनस्पतिं सममानयन्–

**अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता।**
**गोभाज इत्किलासथ यत्सनवथ पूरुषम्।।**[10]

यजुर्वेदे चोक्तम्– **वनस्पतिः शमिता।**[11] **वनस्पतिं शमितारम्।**[12] अथर्ववेदेऽपि केचन वृक्षाः देवत्वेन पूजिताः वर्तन्ते।

मानवेन सह वनस्पतीनाम् अविभाज्यः नित्यश्च सम्बन्धः विद्यते। एतद्विना मानवजीवनं न सम्भवति। अस्मज्जीवने एषाम् उपयोगिता अनिवार्यता च सर्वविदिता वर्तते। प्रकृतौ भूमिजाः जलजाश्च अनेकविधाः वृक्षक्षुपतृणलतावल्लरीरूपात्मिकाः वनस्पतयः भवन्ति। काश्चन स्वतः समुद्भवन्ति, काश्चन वाटिकासु कृषिक्षेत्रेषु च

उप्यन्ते। संस्कृतस्य महाकाव्येषु खण्डकाव्येषु गद्यकाव्येषु चम्पूकाव्येषु नाटकेषु च वनस्पतीनां तद्रूपाणां गुणानां च विशदवर्णनं समुपलभ्यते। प्राकृतिकपरिवेशं प्रति भावुकाः कवयः प्रकृतौ समुपलब्धेषु वनस्पतिषु बाह्याभ्यन्तरसौन्दर्ययोः दर्शनम् अकुर्वन्। ते अस्याः अङ्गानां गुणानां च सादृश्यं मानवेषु अनुभूय काव्येषु एतेषामभिव्यञ्जनां कृतवन्तः। तस्मात् एतत्सम्बद्धाः अनेकाः कविप्रसिद्धयः आविर्भूताः।

अस्माकं पूर्वजाः विविधप्रकारैः वनस्पतीनां प्रयोगमकुर्वन्। यज्ञादारभ्य दैनन्दिनजीवनस्य अलङ्कारप्रसाधनं यावत् वयं पूर्णरूपेण वनस्पतिषु एव आश्रिताः स्मः। रोगहरभेषजत्वेन अस्योपयोगः क्रियते। पर्यावरणशुद्धता अपि वनस्पतिभिरेव विधीयते। परन्तु आधुनिकयुगे भौतिकवादिनः ऐश्वर्यमदमत्ताः मानवाः स्वीयविलासमयलक्ष्यं पूरयितुम् वनमुपवनम् अपरिगणय्य वनस्पतीनां विनाशं कुर्वन्ति। साम्प्रतं पर्यावरणं सङ्कटग्रस्तं वर्तते। अनया विभीषिकया भौतिकवादिनः वैज्ञानिकाः अपि भीताः सन्ति। अत एव वैज्ञानिकाः न केवलं कृषेः उद्यानस्य च उन्नतये प्रयत्नशीलाः सन्ति अपितु वनसंरक्षणार्थं संवर्धनार्थमपि प्रयासं विदधति।

भारतीयमनीषिणः प्रकृतेः सुरम्ये अङ्के वनेषु पर्वतेषु नदीतटेषु वाटिकासु च अङ्कुरण–संवर्धन–विकसन–धर्मावलम्बिषु वनस्पतिषु मानवभावनानां तद्रूपाणां च दर्शनम् अकुर्वन्। तैरनुभूतं यत् वनस्पतिषु अपि प्राणाः भवन्ति, एषु च मानवेषु इव अनुभूतिरपि भवति। सहृदयानां वनस्पतिषु अत्यधिकः स्नेहः आदरश्च दृश्यते। एताः प्रति तेषां मातृभावः गुरुभावः भ्रातृभावः भगिनीभावः पुत्रभावः पुत्रीभावः सख्यभावश्च दर्शितः। अनेन भारतीयसमाजे वनस्पतिं प्रति मानवीयभावनानां तादात्म्यसम्बन्धः ज्ञायते। कविभिः आसां विभिन्नाङ्गेषु मानवसौन्दर्यम् अवलोकितम्। तस्मादेव काव्येषु मानवसौन्दर्यं संवर्धयितुम् एताः उपमानीकृताः। संस्कृतकवयः स्त्रीपुरुषयोः मेलने लतावृक्षयोः मेलनस्य कल्पनां कुर्वन्ति। कालिदासः कथयति यत् अग्निमित्रेण मालविकायाः स्वीकरणं तथैव वर्तते यथा आम्रवृक्षेण अतिमुक्तलतायै आश्रयप्रदानम् भवति–

**परिगृहाण सखे सहकारतां त्वमतिमुक्तलताचरितं मयि।**[13]

राजशेखरः ताम्बूललतया पूगवृक्षस्य आश्रयणं प्रणयिप्रणयिन्योः मेलनमिव[14] तथा च धूर्तस्त्रीपुरुषयोः मेलनं निम्बाश्रये कारवेल्ललतायाः संवर्धनमिव[15] मनुते।

मानवेषु सुखदुःखयोः संयोगवियोगयोः च यादृश्यः संवेदनाः भवन्ति, वरस्पतीषु अपि तादृशीनां मानवीयसंवेदनानाम् अभिव्यक्तिः दृश्यते। प्रियजनवियोगात् नार्यः इव लताः अपि अश्रूणि मुञ्चन्ति। शकुन्तलायाः पतिगृहगमनसमये आश्रमस्थाः लताः

मन्ये पाण्डुपत्राणां माध्यमेन अश्रुमोचनं प्रारब्धवत्यः–

**अपसृतपाण्डुपत्राः मुञ्चन्त्यश्रूणीव लताः।**[16]

कवयः वनस्पतिषु वात्सल्यभावस्यापि कल्पनां कृतवन्तः। तपोवने क्रीडतीषु कन्यासु एताः अतीव प्रीणन्ति स्म। आश्रमात् प्रस्थानसमये शकुन्तलायै कौशेयवस्त्राणि लाक्षारसं विविधानि आभूषणानि च उपायनीकुर्वन्ति।[17]

महिलानां भीतिभावं शूद्रकः सुकोमलासु वनस्पतीषु अभिव्यनक्ति। वसन्तसेनाम् अनुगच्छतः शकारस्य भयेन वसन्तसेना तथा कम्पते स्म यथा कश्चन बालः कदलीपादपः कम्पते।[18] अपि च वसन्तसेनामालिङ्ग्य चारुदत्तस्य शरीरं रोमाञ्चितं सत् कदम्बपुष्पं सञ्जातम्–**संस्पर्शरोमाञ्चितजातरागं कदम्बपुष्पत्वमुपैति गात्रम्।**[19]

आश्रमेषु वनस्पतीनां संरक्षिकाः बालाः वृक्षेषु सोदरस्नेहं धारयन्ति स्म। ताः गुरुवचनपालनार्थं केवलं वृक्षाणां सेचनं न कुर्वन्ति स्म अपितु तेषु सोदरस्नेहकारणात् ताः कार्यमिदम् अत्यन्तं स्नेहेन कुर्वन्ति स्म। शकुन्तला कथयति–**''न केवलं तातनियोग एव, अस्ति मे सोदरस्नेहः एतेषु।''**[20] अपि च **''वनज्योत्स्ने चूतसङ्गतापि प्रत्यालिङ्ग मां शाखाबाहुभिः। अद्यप्रभृति दूरवर्तिनी ते भविष्यामि।''**[21]

वनस्पतिषु मातृभावस्य उदाहरणं प्रथितमेव वर्तते। आमलकी पालनकर्त्री धात्री इव मानवसमाजस्य कल्याणं विदधाति, तस्मादेव तस्याः नामकरणं धात्रीति सञ्जातम्–

**कथं न धात्रीमतिमात्रनामितैः स वन्दमानानभिनन्दति स्म तान्।**[22]

वाटिकासु स्थितेषु वृक्षेषु गुरुशिष्यभावः दृश्यते। नैषधकारः कथयति यत् वृक्षाः शाखारूपकरेषु फलानि पुष्पाणि च स्वीकृत्य वृद्धमहर्षिभ्यः अतिथिसत्कारस्य शिक्षां गृह्णन्ति–

**फलानि पुष्पाणि च पल्लवे करे वयोऽतिपातोद्गतवातवेपिते।**
**स्थितैः समाधाय महर्षिवार्धकाद् वने तदातिथ्यमशिक्षि शाखिभिः।।**[23]

उपवनलतासु ऋषयः पुत्री इव स्निह्यन्ति स्म। नवमालिका लता कण्वमहर्षेः पुत्री एव आसीत्। यथा शकुन्तलया दुष्यन्ताश्रयप्राप्तेः परं सः निश्चिन्तः सञ्जातः तथैव नवमालिकाया आम्राश्रयप्राप्तेः अनन्तरमपि अन्वभवत्।

भासः अपि वृक्षेषु पुत्रतुल्यं स्नेहं विधातुम् उपदिशति। सीतारामौ वनवासकाले जनस्थाने पुत्रस्नेहेन अतीव प्रेम्णा पादपान् संवर्धयतः–**अप्यत्र ज्ञायन्ते पुत्रकृतकाः वृक्षाः।**[24] तेषां वर्धनं विलोक्य तौ अतीव प्रसीदतः।

शूद्रकः निगदति यत् सहृदयजनानां मनसि वनस्पतिं प्रति कोमलवात्सल्यभावः भवति ते कुसुमितवनस्पतेः पुष्पस्वीकरणमपि अनुचितं मन्वते। मृच्छकटिकस्य नायकः चारुदत्तः तादृशः एव वर्तते। लतायाः आकर्षणेन तस्याः पल्लवं खण्डितं स्यादित्येतदर्थं सः मालवीलतायाः पुष्पं नैव स्वीकरोति– **यः कुसुमितां माधवीलतामाकृष्य कुसुमावचनयनं न करोति कदाचिदाकृष्टतया पल्लवच्छेदो भवति।**[25]

अस्माकं धार्मिकसाहित्ये अपि वनस्पतेः पावित्र्यं विशेषरूपेण वर्णितं वर्तते। विष्णुधर्मसूत्रानुसारेण अस्मिन् लोके आरोपितः वृक्षः परलोके पुत्रत्वेन प्राप्यते–

**वृक्षाः रोपयितुः वृक्षाः परलोके पुत्राः भवन्ति।**[26]

मत्स्यपुराणे उक्तम्–

**दशकूपसमा वापी दशवापीसमो ह्रदः।**
**दशह्रदसमः पुत्रः दशपुत्रसमो द्रुमः॥**[27]

महाभारते वृक्षाः सन्ततिवत् पालयितुम् उक्ताः, यतः ते पुम् नामनरकात् मनुष्यं रक्षन्ति **पुत्रवत्परिपाल्याश्च पुत्रास्ते धर्मतः स्मृताः।**[28]

मानवीयभावनायाः परिवेशस्य च प्रकटनार्थं सर्वाधिकं समर्थं माध्यमं काव्यं वर्तते। साहित्यसर्जकाः कवयः स्वरचनासु काव्यप्रतिभाभिव्यञ्जनेन सह तद्युगीनं सांस्कृतिकवैशिष्ट्यम् अपि प्रकटयन्ति। एभिः इमानि तत्त्वानि यद्रूपेण दृश्यन्ते अनुभूयन्ते च तद्रूपेणैव तेषां सन्निवेशः काव्येषु क्रियते। अतः युगविशेषस्य वस्तुतथ्यानि अवगन्तुं तद्युगीनसाहित्यस्य अध्ययनम् आवश्यकं भवति।

'प्रेमरहस्यं' खण्डकाव्यं वर्तते। अस्य प्रणेता मैथिलश्रोत्रीयः आचार्यः रामजीठाकुरः वर्तते। श्रीमतः ठाकुरवर्यस्य उपपञ्चाशत् मौलिककाव्यानि सन्ति। भारतस्य महामहिमशालिना राष्ट्रपतिमहाभागेनायं सम्मानितः। साहित्य–अकादमी द्वारा इतरसंस्थाभिश्च अस्य विविधाः रचनाः पुरस्कृताः वर्तन्ते।

आचार्यरामजीठाकुरप्रणीते प्रेमरहस्ये उत्कृष्टतमा वानस्पतिकचेतना परिलक्ष्यते। खण्डकाव्येऽस्मिन् सङ्केतितः युवकः केवलम् उपलक्षणत्वेन विद्यते। वस्तुतः तस्य युवकस्य प्रतिनिधिभूताः अनेके मानवाः नेत्रे निमील्य वनस्पतिसंहारं कुर्वन्तस्सन्ति। अत एव साम्प्रतं वनस्पतिविषये मानवानामस्माकं सुसुप्तां चेतनां जागरयितुं काव्यमिदं महदुपकारकं वर्तते।

अस्मिन् प्रेमरहस्यनाम्नि खण्डकाव्ये तरु–मानवयोः प्रेमकथा वर्णिता अस्ति। कविना अत्र पर्यावरणसुरक्षायै वरसंरक्षणस्य चेतनां जागरयितुम् अत्यन्तम् उत्कृष्टः

प्रयत्नः विहितोऽस्ति। निरपेक्षस्य त्यागैकपरस्य प्रेम्णः स्वरूपं प्रकाशयता तद्रहस्यं च तत्त्वतः वेदयितुं समुत्कण्ठा अत्र समुन्मेषिता वर्तते। कोऽपि क्वचिन्निरतिशयं प्रेमाणमावहन्नपि तत्प्रत्युत्तरं नाप्नोति। कोऽपि प्रेमपरवशः प्रेमास्पदाय सर्वस्वमर्पयति, स्वार्थान्धितधिया प्रेमास्पदेन तन्मूल्यं न किमपि गण्यते। प्रेमालम्बनं प्रेमवतः व्यथां नाकलयति। इदमेकनिष्ठं प्रेम रसभासतां याति। पारस्परिकप्रीतिसमुल्लासे उभयप्रार्थनायाः कारणतां महाकविः कालिदासोऽपि स्वीकुरुते– ''रतिमुभयप्रार्थना कुरुते'' इति। प्रेमबीजमिदं सर्वत्र अङ्कुरितं न दृश्यते। जन्मजन्मान्तरसौहृदमपि एकनिष्ठं कथमिवावतिष्ठते। केनाप्यत्र कारणेन भवितव्यम्? तरोरिममेव प्रश्नमुत्तरीतुमक्षमः कविर्मनसि महान्तं भारमिवानुभवति–

**श्रुत्वा प्रश्नमिमं न चोत्तरमदः किञ्चिद्दधन्मौनितां**
**सम्प्राप्तो भवनं निजं च हृदये भारं महान्तं वहन्।**[29]

अस्मिन् काव्ये एकस्य परोपकारिणः आम्रवृक्षस्य सौमनस्यस्य तथा च स्वार्थान्धमानवस्य निष्ठुरतायाः वर्णनं कविना कृतम्। कस्मिंश्चित् सुरम्ये कानने एकः सुविशालः पादपः आसीत्। तत्र कश्चन बालः क्रीडितुम् आयाति स्म। तस्मिन् बाले पादपवरस्य महान् स्नेहः सञ्जातः। बाले प्रीतिनिबद्धमनाः प्रतीक्षारतः व्याकुलः सः तरुः प्रत्यहं वातान्दोलितशाखया खगरुतैश्च तमाकारयति स्म–

**आयाति स्म तरोस्तले लघुवयाः कोप्यर्भकः खेलितुं**
**सौरभ्येन फलेन पक्षिनिनदैः श्रोत्रप्रियैर्मोहितः।**
**तस्मिन् प्रेमनिबद्धमानसतरुर्नित्यं प्रतीक्षारतः**
**वातान्दोलितशाखया खगरुतैराकारयत्याकुलः।।**[30]

गते बाल्ये स्वार्थतृष्णान्धितः सः तरुणः सौख्यं प्राप्तुम् अर्थचिन्तनपरः सन् इतस्ततः भ्राम्यन् तरोः सख्यं च विस्मृत्य बहूनि वर्षाणि यावत् पादपसकाशं नैवागतः। एकस्मिन् दिने चिरप्रतीक्षितं तं दृष्ट्वा पुष्पैः फलैः च तत्स्वागतं विधाय निश्छलमनाः सः वृक्षः तत्र अनागमनस्य कारणं तम् अपृच्छत्। तच्छ्रुत्वा युवकः स्वीयं सर्वं मनोगतं समुद्गीर्णवान्। सः अवदत् यत् त्वं वृक्षः असि, त्वया सह मैत्रीं विधाय मम कः लाभः? अहं महानगरं गत्वा सखीभिः सह विहर्तुमिच्छामि। तदर्थं प्रभूतं धनम् आवश्यकं, त्वं मम काम् अपेक्षां पूरयेः?[31] युवकस्य रुक्षां वाचं श्रुत्वा पादपः मर्माहतः अभूत्। पुनरपि सः सहर्षं स्वीयानि पक्वानि फलानि प्रदातुं सज्जः। परन्तु स्वार्थी युवकः वृक्षस्य मानसम् अज्ञात्वा एव तस्य पक्वम् अपक्वं च सर्वं फलं

नीत्वा झटिति ततः प्रस्थितः–

**त्वां दृष्ट्वैव महत्सुखं मनसि मे सञ्जायते सर्वदा**
**त्वत्सानिध्यरसात्परं न गणये वस्त्वत्र नूनं सखे।**
**सिक्तं प्रीतिरसेन तस्य वचनं शून्येऽभवद्रोदनं**
**पक्वापक्वफलानि निष्ठुरमनाः सङ्गृह्य शीघ्रं गतः॥**[32]

गते युवके समर्पितदृशा वृक्षेण तस्य प्रतीक्षायां महान् कालः यापितः। सः आगमिष्यतीति विचिन्त्य वृक्षः प्रतिदिनं तस्य मार्गावलोकनं करोति स्म। बहोः कालादनन्तरं निजसखं तं विलाक्य अत्यन्तम् उल्लासेन स्वागतं विधाय आरोग्यादिकञ्च विचार्य सुदीर्घकालात् तस्य अनागमनस्य कारणम् अपृच्छत्। तच्छ्रुत्वा युवकः सौहार्दं परित्यज्य स्वकीयपरिणयवार्तां संश्राव्य पत्न्यै सुन्दरभवननिर्माणार्थं धनस्य अपेक्षां प्राकटयत्।[33] वृक्षः स्वार्थपरवशस्य युवकस्य साहाय्यार्थं स्वकीयां शाखां छित्त्वा तद्विक्रीय च धनं प्राप्तुम् उपायम् असूचयत्–

**तद्व्याख्यां धनमाश्रितां सचकितं प्रेम्णो निशाम्यन् तरुः**
**स्तब्धोऽभूत् क्षणमेष चिन्तनपरः प्रोवाच पीडाकुलः।**
**शाखा मे विपुलाः सखे! बहुतराश्छित्त्वा धनं लभ्यताम्**
**तेन स्वीयगृहं विरच्य भवता पत्न्या सुखं स्थीयताम्॥**[34]

कविना उच्यते यत् प्रेमी सर्वस्वं समर्प्य आनन्दम् अनुभवति। सः किमपि प्रतिप्राप्तुम् आशां न धारयति। प्रेमिणे सहर्षम् आत्मानमपि प्रयच्छति। परन्तु स्वार्थलोलुपस्य कठोरहृदयस्य जनस्य विषये किं वक्तव्यम्–

**शाखास्तस्य तरोरसौ हतमतिश्छित्त्वाऽगमत्स्वालयं**
**सर्वस्वार्पणनिस्वप्रेमरसिके दृष्टिं न किञ्चित् क्षिपन्।**
**स्थाणुत्वञ्च गतोऽपि चैष मनसा कल्याणकामश्चिरं**
**ध्यायन् तिष्ठति प्रेमतत्त्वममलं केनेह विज्ञायताम्॥**[35]

युवकः स्वकीयविविधेच्छापूरणे असमर्थः आसीत्। सः सन्ततिचिन्तया आहतः अभूत्। तस्य सर्वाः आशाः विनष्टाः। विभिन्नैः विषादैः मनः खिन्नम् अभवत्। बहूनि दिनानि यावत् इतस्ततः भ्राम्यन् जीवनमार्गं निश्चेतुम् अक्षमः सः कदाचिद् एकान्तस्थिरसौहृदं तरुवरम् अस्मरत्। तत्समीपं गत्वा परिवारसमस्याः समुपस्थाप्य च अकथयत् यत् मदीया एका नौका भवेच्चेत् तद्द्वारा अहं सम्यक् धनार्जनं कर्तुं शक्नुयाम्।[36] वस्तुतः मोहग्रस्तैः जनैः प्रेमरहस्यमखिलं न ज्ञायते, प्रेमपथिकैश्च सदैव पीडारसः पीयते।

किन्तु प्रेमिणा पीडायामपि अमन्दमानन्दः अनुभूयते। वृक्षः किमपि अविचिन्त्य विना विलम्बं तत्प्रस्तावमङ्गीकृत्य अकथयत्–

**स्कन्धांश्छिन्धि सुखं समान् मम सखे! मूलं जहत्केवलं**
**वृद्धिर्मेऽथ पुनर्भवेत्तव सुखं शान्तिञ्च सन्द्रक्ष्यतः।**
**रत्नं सिन्धुतले श्रुतं न लहरीलास्ये च वा लभ्यते**
**नावं यत्नशतेन चालय सखे! ह्येषा ममाभ्यर्थना॥**[37]

महादानिना शिविना इत्थमुक्त्वा मुदितेन तेन तरुणा समे स्कन्धाः तस्मै शून्यहृदे जनाय तथैव समर्पिताः यथा स्वीयं वपुः श्येनाय समर्पितम्। सोऽपि वित्तप्रियः अकरुणः युवकः दुःसहां मित्रव्यथाम् अचिन्तयन् निर्दयं वृक्षस्य सर्वं कायं खण्डयित्वा अनयत्।[38] पुनश्च सः मानवपशुः तत्समीपं नैवागतः।

बहूनां दिनानामनन्तरं कविः तस्यां दिशि अगच्छत्। शाखाविहीनं चिन्तामग्नं च तं वृक्षं विलोक्य सस्नेहं चिन्तायाः कारणम् अपृच्छत्। तदनु पूर्वकथाः संश्राव्य वृक्षः अकथयत् यत् मम सखा इतः नीतं काष्ठं विक्रीतवान् उत नौकां निर्मितवान्, तस्य व्यापारः वर्धितः अथवा सनावं सः समुद्रे पतितः इति ध्यायं ध्यायं मे हृदयं दुःखाकुलं वर्तते–

**दत्तं तस्य मनो मयाऽथ निखिलं नैसर्गिकं वैभवं**
**नातृप्यत् स च चिन्तयाकुलमना नोपाय एवापरः।**
**तत्सौख्यार्थमनुस्मरामि सततं सर्वेष्टसम्पूरकं**
**नित्यं चात्र प्रभुं समस्तमनसा किं वा त्वया चिन्त्यते॥**[39]

वृक्षस्य दयार्द्रनिर्मलकथां श्रुत्वा कविः अत्यन्तं श्रद्धावनतः सञ्जातः। तस्य दशां च दृष्टवति विषण्णमनसि कवौ महान् क्षोभः समुद्भूतः।[40] कविः चिन्तयति यद्वैधसी मानवमयी सृष्टिरियं श्रेष्ठा शुभा चासीत्। परन्तु साम्प्रतं तु मनुजः पशुभ्योऽप्यधिकं नीचः सञ्जातः। जङ्गमप्राणिषु श्रेष्ठतमं स्थानं प्राप्तवतः मानवस्य एतादृशं क्रूरं व्यवहारं विलोक्य कविः सकोपं वृक्षमेव अपृच्छत्– कृतघ्नाय मनुजाधमाय तस्मै हृदयं प्रदाय त्वया किं कृतम्.....? परन्तु कवेः सर्वाणि वचनानि सावधानमनसा श्रुत्वाऽपि ध्याननिमग्नः सः तरुवरः किमपि प्रत्युत्तरम् अदत्त्वा मौनमेवाधात्–

**मार्गे दत्तदृशा च तस्य तरुणा सोऽयं प्रतीक्ष्यः सदा**
**नित्यं तत्पथमागतैश्च पथिकैरद्यापि चालोक्यते।**

**आशा स्वर्णमयीव रज्जुरनया चित्ते निबद्धो जनः**
**सङ्कल्पं कुरुतेऽनुकूलमथवा प्राणांस्त्यजेन्निश्चितम्॥[41]**

प्रेमरहस्यम् अनिर्वचनीयं भवति। कश्चन प्रेमी एव प्रीतियोगं ज्ञातुं प्रभवति। रागः सदैव परिणतौ शोकवपुः सञ्जायते। सः पादपवरः स्वकीयप्रेम्णः प्रतिदानं न वाञ्छति, अपितु तं सुखिनं दृष्ट्वा प्राणान् जिहासुः। तस्य अभिलाषोऽयं पूर्णः स्यात् न वेति नियतिः केन ज्ञायेत?

विधेः माया विचित्रा भवति। युवकस्य दर्शनेच्छायां शोकसन्तप्तस्य मरणासन्नस्य दिवसगणनातत्परस्य तस्य वृक्षस्य भाग्यं स्फुरितम्। अनामिका काचित् वनेचरी तत्रागत्य तस्य तरोः दशां विलोक्य अतीव दुःखमन्वभवत्। सा वृक्षं परितः आलवालं विरचय्य वात्सल्यभावेन तस्य सेवां प्रारभत। प्रेमार्चके तस्मिन् पादपे अचिरादेव प्रेमरससिञ्चनस्य परिणामः संलक्षितः। कविः नारीप्रीतिबलस्य माहात्म्यं वर्णयन् निगदति–

**काचित्तत्र वनेचरी करुणया मूलावशेषं तरुं**
**मृद्भिः सुन्दरमालवालरचनां कृत्वा पयोभिर्मुदा।**
**सिञ्चन्ती ममतामयीव जननी बालं यथाऽपालयत्**
**नारीप्रीतिबलेन जीवति जगत् केनात्र सन्दिह्यताम्॥[42]**

सा वनेचरी पूर्वं गुरुकुले उषित्वा शिक्षामवाप्तवती। तस्मात् लतापादपेषु तस्याः नैसर्गिकस्नेहः आसीत्। वन्यजीवरक्षाव्रतदीक्षितायाः ब्रह्मचारिण्याः तस्याः लालनेन अचिरादेव तस्मिन् तरुवरे प्रभूताः अरुणपत्रकान्तिरुचिराः शाखाः समुद्भूताः। तस्य कर्णप्रियां दानललितां कथां निशम्य जनाः श्रद्धया तद्दर्शनार्थम् आयान्ति स्म। तस्मिन् वृक्षे खगाः समागत्य पुनः आनन्दकलकलरवं प्रारब्धवन्तः। कौमारव्रतचारिणी सा वनेचरी तत्रत्यवनवासिनः कल्याणार्थम् एकां शालां स्थापितवती। तत्र प्रातः बालानां शिक्षणं भवति स्म। मध्याह्ने महिलाः समागत्य ज्ञानविज्ञानवार्तां शृण्वन्ति स्म। सायं च ज्येष्ठाः आगत्य लोकधर्मचर्चां कुर्वन्ति स्म। एवम्प्रकारेण वन्यैः पुष्पैः पादपैः मुखरितैः भृङ्गैः लसद्वल्लरीश्लिष्टैः कोकिलकाकलीसुललितं तत्पादपाधिष्ठितं तत्स्थानं नन्दनवनं सञ्जातम्।

अपरत्र सः युवकः समुद्रे नौकया सन्तरन् बृहत् बृहत् मीनान्, तीरे तरङ्गागतानि मौक्तिकानि च सङ्गृह्य विक्रीतवान्। तेन प्रभूतं धनं समपादयत्। परन्तु तस्य वित्तैषणा नैव पूर्णा। अतः पुनः तद्वनं प्रत्यागत्य तत्रत्यं वनसौष्ठवं च दृष्ट्वा अत्यधिकधनसम्पादनार्थं सः तत्रैव काष्ठव्यापारं कर्तुमैच्छत्–

**दारूद्योगमयं चिकीर्षुरलघु स्थानं च निर्णीतवान्**
**रम्यस्यास्य वनस्य तेन तरुणाऽधिष्ठाय तीर्थीकृतम्।**
**यस्य प्रीतिरसेन पोषितवपुर्भूत्वापि दुष्टाशयः**
**तद्वंशस्य निपातने कृतमतिर्जातो धनेच्छाहतः॥[43]**

कविः कथयति यत् वित्तासक्तमनाः सदैव वित्तमेव चिनुते। ततः कामनापूर्त्यै एव सततं यतते। सः परेषां चिन्तां न कदापि कुरुते।[44] वित्तबलेन अनैतिकं कार्यमपि सारल्येनैव सम्पादयति।

काननसमुच्छेदनतत्परः सः युवकः दारूद्योगं समारब्धुम् उत्कोचं प्रदाय सच्छाशनात् आदेशमपि प्राप्नोत्। विषयममुं ज्ञात्वा समष्टिदृष्टिनिपुणा कल्याणसंवर्धिनी वनवासिनिश्छलसखी सा अरण्यदेवी सन्नद्धीभूय न्यायालये तस्य सकलं प्रयत्नं निष्फलं व्यधात्।[45] न्यायाधीशस्य पुरतः सधैर्यं सा इत्थम् उपास्थापयत्–

**वन्द्यञ्चैतदरण्यमस्ति प्रकृतेरङ्गं च पूर्णार्थकं**
**नित्यं जीवयते च जीवनिवहान् स्निग्धं घनं श्यामलम्।**
**प्रीत्याकर्षति जीवनाय जगतो नोच्छेदनीयं परं**
**पाल्या पादपसम्पदत्र मनुजैः कल्याणकामैः शुभा॥[46]**

अपि च सृष्टिचक्रं निरूपयन्ती सा अकथयत्–

**पूर्णा सृष्टिरियं परस्परयुता तत्रांशहानावपि**
**न्यूनत्वे प्रकृतौ विशृङ्खलवपुः सम्पद्यते सर्वतः।**
**उत्पादो बलवान् समस्तभुवने नैसर्गिको निश्चितं**
**तोयाप्लावितसर्वलोकवसतिः पृथ्वी च सञ्जायताम्॥[47]**

तस्मिन् वने वनदेव्याः सेवाश्रमलग्नताफलं शीघ्रमेव दृष्टम्। सर्वेषां प्रसन्नतां विलोक्य सः पादपोऽपि मुदितमनाः अभूत्। एकदा सायं कविरसौ भ्राम्यन् तद्वनम् अगच्छत्। सेवाप्रीतिरसेन पोषितवपुः सः वृक्षः नितान्तं समुत्सुकः तेन विलोकितः। अभितः पवनेरिताभिः शाखाभिः परां प्रीतिम् आकिरन् सः भ्रमरझङ्कारमधुभाषितं स्वागतञ्च विधाय कविम् अपृच्छत्–

**सोऽपृच्छच्च विचित्रमानवमनोगूढं रहस्यं तरु-**
**र्यस्मै दत्तमना अशेषविभवं प्रादामहं निस्पृहम्।**
**मूलोच्छेदसमुद्यतः स च जनो यस्यै न चाल्पं मया**
**दत्तं तद्गतवेतसाऽथ जननीस्नेहेन साऽपालयत्॥[48]**

पादपस्य प्रश्नम् आकर्ण्य कविः निरुत्तरः समभवत्। 'प्रेमरहस्यस्या'स्य प्रणेता आचार्यः रामजीठाकुरमहोदयः पर्यावरणसंरक्षणं प्रति अतीव संवेदनशीलः वर्तते। काव्येऽस्मिन् तस्य वानस्पतिकचेतना अत्यन्तं मुखरिता विद्यते। अस्य परिशीलनेन ज्ञायते यत् प्रकृतिः अस्माभिः न पीडनीया, सा संरक्षणीया। सर्जनं विनाशश्चेति प्रकृतेः पक्षद्वयं वर्तते। अस्याः सहजधर्मः सर्जनमेवास्ति, अस्याः कोमलरूपं प्राणिमात्रं पोषयति। किञ्च मानवकृतोपद्रवैः अत्याचारैः अनाचारैः पापकर्मभिश्च प्रकुपितायाः अस्याः विकरालरूपं क्षणेनैव सृष्टिं विनाशयति। अत एव अस्याः प्रसन्नता साम्यावस्था च यथा स्यात् तथैव अस्माभिः कर्त्तव्यम्। अनेनैव सम्पूर्णवसुधायाः कल्याणं भविष्यतीति काव्यमिदमस्मानुपदिश्य स्वकीयप्रयोजनसिद्धौ सम्पूर्णतया साफल्यमधिगच्छति।

***

**सन्दर्भाः—**


1. साङ्ख्यकारिका - 3
2. श्रीमद्भगवद्गीता 2.27
3. वेदान्तसारः, कृष्णकुमार, पृ.73
4. अथर्ववेदः 12.1.12
5. अभि.शाकु. 4.5
6. उत्तरमेघः - 46
7. अथर्ववेदः 4.106.1
8. अभि.शाकु. 4.2-3
9. ऋग्वेदः 10.97.4
10. तत्रैव 10.97.5
11. यजुर्वेदः 21.35
12. तत्रैव 28.9
13. मालविका. 4.13
14. विद्धशाल. 4.11
15. तत्रैव, पृ.140
16. अभि.शाकु. 4.12
17. अभि.शाकु. 4.5

18. मृच्छ. 1.20
19. तत्रैव 5.47
20. अभि.शाकु., पृ.303
21. अभि.शाकु. पृ.105
22. नैषध. 1.98
23. तत्रैव 1.77
24. प्रतिमा., पृ.172
25. मृच्छ., पृ.370
26. विष्णुधर्मसूत्रम् 91.4
27. मत्स्यपुरा. 154.512
28. महा.अनु.पर्व 58.31
29. प्रेमरहस्यम् 50
30. तत्रैव - 3
31. तत्रैव - 6
32. तत्रैव - 8
33. तत्रैव - 10
34. तत्रैव - 12
35. तत्रैव - 13
36. तत्रैव - 18
37. तत्रैव - 19
38. तत्रैव - 20
39. तत्रैव - 23
40. तत्रैव - 25
41. तत्रैव - 30
42. तत्रैव - 32
43. तत्रैव - 40
44. तत्रैव - 42
45. तत्रैव - 43
46. तत्रैव - 45
47. तत्रैव - 46
48. तत्रैव - 49

***

# संस्कृतसाहित्ये गीतकाव्यविधा

**सत्येन्द्रपाण्डेयः**

(**सारांशः—**संस्कृतसाहित्यस्यान्यविधापेक्षया गीतकाव्यविधा नितरामुपेक्षिता दृश्यते। बाहुल्येन एतस्याः विधायाः साहित्ये प्रयोगेणापि किमर्थमस्याः व्याख्यानं, एतादृग्रचनाय सन्तुष्टिदायकं निर्देशनं ग्रन्थमाध्यमेन नावाप्यते इति महदाश्चर्यम्। शोधरते सति मया विषयोऽयं दृग्गोचरीभूतः। अत इदानीं व्यवस्थापितमिदं शोधपत्रम्। पत्रेऽस्मिन् गीतस्य लक्ष्यगतं स्वरूपं, महत्त्वमथ च पारम्परिकं सदपि आधुनिकयुगानुकूलं संस्कृतगतं नवगीतलेखनं सूचितम्। शास्त्रीयं लौकिकञ्चेति गीतस्य द्विविध विभाजनमथ च लौकिकगीतान्तर्गतं प्रदेशविशेषे विविधभावाधारितं लोकगीतं साम्प्रतं संस्कृतलेखनविषयीभूतं कथं जायते सर्वमिदं संक्षेपेण प्रस्तूयते।)

गीतं चित्ताकर्षकं हृदयावर्जकं सर्वजनानुभवगम्यं भवति। अनुभूतेस्तीव्रतां व्यञ्जयदिदं नैकविषयावगाहमानं काव्यरसिकानाह्लादयति। अस्य रचनायां सरसकान्तपदावली, भावमाधुर्यम्, विषयानुसारिणी गेयात्मकता इदमितोऽपि प्रभावपूर्णं करोति। **'गीयते इति गीतम्'** इति भावव्युत्पत्त्या गै शब्दे धातोः भावे क्त प्रत्यये सति निष्पन्नोऽयं गीतशब्दः गानस्य पर्यायो वर्तते। अमरकोषे हलायुधकोषे च उभयोरपि पर्यायत्वेन प्रयोगः कृतोऽस्ति।[1] सम् उपसर्गपूर्वक गीतशब्दस्य प्रयोगेन नृत्यवाद्यादिसहितस्य गीतस्यावबोधो भवति–**गीतं वाद्यं तथा नृत्यं त्रयं संगीतमुच्यते।** एवमेतयोः गीतसंगीतयोः किञ्चित्पार्थक्यं वर्तते।

संगीतस्य गीतस्य वा उद्भवः वेदादेवाभूदिति नास्त्यविदितम्। सामवेदे 'साम' शब्दः गीतिपर्यायोऽस्ति–**गीतिषु सामाख्येति राजशेखरः।**[2] वैदिकमहर्षीणां संगीतस्य सम्यग्ज्ञानमासीत्। ऋग्वेदस्य नैके मन्त्राः संगीततत्त्वेन परिपूर्णाः सन्ति। ऋग्वेदीयमन्त्रेऽपि लौकिकगीतवत् ध्रुवकस्य अर्थात्पादवृत्तेः प्रयोगोऽवाप्यते।[3] एवमेव हिरण्यगर्भसूक्ते

‘**कस्मै देवाय हविषा विधेम**’ इति वाक्यस्यांशस्य प्रतिमन्त्रं प्रयोगो वर्तते। मन्त्रपाठाय उदात्तानुदात्तस्वराणां प्रयोगो भवति। आर्यगणाः सस्वरं गानं कुर्वन्तः पठन्ति स्म। ऋग्वेदात् गेयभागः उद्गातृभिः यज्ञावसरे मधुरस्वरेण गीयते स्म। इमान् गेयात्मकमन्त्रान् संकलय्य व्यासेन सामवेदरूपेण परिकल्पितमऽस्ति। कालान्तरे संगीतमधिकृत्य नैके पाण्डित्यपूर्णाः ग्रन्थाः रचिताः अथ चेदं संगीतं शास्त्ररूपतामवाप्नोत्। राजकुमारजगदेकमल्लस्य ‘**संगीतचूडामणिः**’ महाराजहरपालस्य ‘**संगीतसुधाकरः**’ सोमराजदेवस्य ‘**संगीतरत्नावली**’ शार्ङ्गदेवस्य ‘**संगीतरत्नाकरः**’ पार्श्वदेवस्य ‘**संगीतसमयसारः**’ महाराणाकुम्भेत्यस्य ‘**संगीतराज**’ प्रभृतयः प्रसिद्धाः संगीत-शास्त्रीयग्रन्थाः सन्ति। एषु ग्रन्थेषु संगीतसम्बद्धानां स्वर-ताल-लय-मूर्च्छना-ग्राम-रागादीनां विवेचनं विश्लेषणञ्च प्राप्यते। ग्रन्थानामेतेषां न्यूनता इयमस्ति यत्स्वरादीनां लक्षणमात्रं उपलभ्यते तदुदाहरणानां नितान्तमभावो वर्तते। सम्भवतः संस्कृत-भाषायामेतादृश्याः रचनायाः अभावादेवोदाहरणं नोपलभ्यते।

गीतं कस्यां विधायां स्थापनीयमिति विषये भारतीयकाव्यशास्त्रिणः न किमपि निर्दिशन्ति। आचार्यवात्स्यायनः गीतमिदं चतुःषष्टिकलास्वन्यतमं मनुते।[4] एवं काव्या-त्पृथक्कलायां कस्याँश्चित् भिन्नविधायां स्वीकरणादेव भारतीयालङ्कारिकाः काव्यस्य विविध-भेदोपभेदं कुर्वाणा अपि गीतिकाव्यशब्दस्य प्रयोगं न कुर्वन्ति, न च गीतात्मककृतीनां विवेचनं कुर्वते। नाट्यशास्त्रे **छन्दो गीतकमासाद्य त्वङ्गानि परिवर्तयेत्।**[5] ‘**छन्दो-गीतकम्**’ इति शब्दस्य अथ च गेयपदमिति शब्दस्य प्रयोगोऽवाप्यते।[6] परं भामहादारभ्य पण्डितराजजगन्नाथं यावत् गीतविषयकं विवेचनं नैव वर्तते। पाश्चात्त्य-साहित्यशास्त्रिणः संगीतमपि काव्यस्यान्यतमं भेदं स्वीकुर्वन्ति। एते विविधविषयं भावं वाधिकृत्य अस्य भेदान् कुर्वन्ति। अत एव पाश्चात्त्यसंस्कृतसाहित्यस्य कीथप्रभृतयः इतिहासकाराः स्वेतिहासग्रन्थेषु गीतकाव्यस्य विवेचनं कुर्वन्ति। गीतकाव्यस्य पाश्चात्त्यावधारणामधिकृत्यैव इतिहासकाराः स्वेतिहासग्रन्थेषु गीतकाव्यस्य विवेचनं कुर्वन्ति। गीतकाव्यस्य पाश्चात्त्यावधारणामधिकृत्यैव ‘**मैक्डोनल**’ प्रभृतयः विद्वांसः कालिदासस्य ‘**मेघदूतम्**’ गीतिकाव्यान्तर्गतं मन्वते। परं भारतीयसंगीत-शास्त्रीयसिद्धान्तानुसारं नेदं सम्भवति। यतोहि ‘**न गानं ध्रुवकं विना।**’[7] इति संगीतशास्त्रीयनियमानुसारं गीते ध्रुवकस्यापरिहार्यता वर्तते। एतदेव हिन्दीभाषायां ‘टेक’ इति कथ्यते। यद्यपि अभिज्ञानशाकुन्तलादिनाट्यग्रन्थे ग्रीष्मर्तुसम्बद्धगीतं हंसपदिकागीतं श्लोकमयमेव वर्तते न तु तत्र ध्रुवकस्य प्रयोगो विद्यते तथापि तत्र गीत-गीतिशब्दयोः व्यवहारेण प्रतिभाति

यत्सर्वत्र ध्रुवकानां प्रयोगोऽपेक्षितः परं क्वचित्तदभावेऽपि गेयात्मकप्रकृतिकं पद्यं गीतं वक्तुं शक्यते। अत एव मेघदूत-अमरुकशतक-सदृशकाव्येषु ध्रुवकाभावेऽपि गीतिकाव्यस्य व्यवहारो भवति। अथ च स्वर-ताल-लय-ध्रुवकसमन्वितस्य गीतस्य संस्कृतसाहित्यजगति सर्वथाभावः आसीदिति न वक्तुं शक्यते। कविकोकिलस्य जयदेवस्य 'गीतगोविन्दम्' इति काव्यं संस्कृतभाषायां निबद्धं संगीतशास्त्रीयनियमानुकूलं विश्वप्रसिद्धं काव्यं वर्तते। अस्य रचनाविधानं उत्कृष्टगेयात्मकप्रकृतिं चाभिलक्ष्य प्रतिभाति यन्नूनमेव गीतकाव्यलेखनस्यापि कापि परम्परा स्यात्। नाट्यशास्त्रस्य '**अभिनवभारती**' टीकायामभिनवगुप्ताचार्यः '**गीयते इति गीतं काव्यम्**'[8] इति व्युत्पत्तिं कृत्वा काव्यस्यैवापरपर्यायं गीतं स्वीकृतवान्। अर्थात् काव्यगीतयोः नास्ति कश्चन भेदः। असौ गेयात्मकप्रकृतौ विरचितं काव्यं '**रागकाव्यम्**' कथयति। एतदतिरिक्तं ढक्करागे '**राघवविजयम्**' ककुभरागे '**मारीचवधम्**' इति काव्यद्वयमपि उदाहरणेन प्रास्तौत्।[9] एवं काव्यद्वयमिदं नृत्यप्रधान-मभिनयात्मकञ्च वर्तते। एतेषामभिनयं गानपूर्वकं भवति स्म, अत इदं '**रागकाव्यम्**' अभिधीयते स्म। इत्थं रागकाव्यास्तित्वस्वीकरणेन सिद्ध्यति यज्जयदेवात्पूर्वमपि रागकाव्य-लेखनस्य काचित्परम्परा आसीत्। तत्परम्परायामेव '**गीतगोविन्दम्**' काव्यं विरचितम्। वस्तुतः गीतात्मककृतिमपि काव्यविधायामङ्गीकृत्य श्रव्यकाव्यस्य गीतं, गद्यं, पद्यं, गद्यपद्यमिश्रञ्चेति चतुर्धा विभागः करणीयः।

अभिराजराजेन्द्रमिश्रः गीतस्य विकासं वैशिष्ट्यञ्चावबोधनं गीतस्य पर्यायरूपेण चतुरः शब्दान् प्रयुङ्क्ते गीतिः, गीतम्, गेयम्, गानञ्चेति।[10]

असौ गीतस्य प्रभावं दर्शयति यद्गीतमिदं न केवलं देवं मानवं प्रत्युत जीवमात्रं सम्मोहयति। अत एव तु वीणाध्वनिना मोहिताः सर्पाः सर्पकारेण बद्धाः भवन्ति। गजाः हरिणाश्च गीतमयं ध्वनिं शृण्वन्तः वशीकृताः भवन्ति। अनेन सिद्ध्यति यदन्यविधापेक्षया गीतस्य प्रभावः कश्चन अधिक एव वर्तते।

गीतस्य एवंविधं प्रभावं विज्ञाय कवयः दृश्यकाव्ये गीतस्य योजनां कुर्वन्ति। विश्वविश्रुतस्य महाकविकालिदासस्य '**अभिज्ञानशाकुन्तलम्**' इति नाटकस्यारम्भे एव सूत्रधारः परिषदः मनोरञ्जनाय गीतमेव उत्कृष्टतमं साधनं मत्वा तद्गानाय नटीं निर्दिशति– '**आर्ये किमन्यदस्याः परिषदः श्रुतिप्रमोदहेतोर्गीतात्करणीयमस्ति।**'[11] अथ च नट्याः मुक्तभावेन गानं[12] श्रुत्वा सूत्रधारः तत्प्रशंसायां ब्रवीति यत् तवरागसमन्वितेन गीतेन मे चित्तं तथैव हृतमभूत् यथा धावता मृगेण राजा दुष्यन्त आकर्षितः।[13] एवमेव नाटकस्यास्यैव पञ्चमाङ्के हंसपदिकाया कटाक्षपूर्णं गीतं[14] श्रुत्वा दुष्यन्तः प्रशंसति–

‘**अहो रागपरिवाहिनी गीतिः।**’ एवमत्र महाकविकालिदासेन चित्तहारित्वं, रागपरिवाहित्वञ्चेति गीतस्य वैशिष्ट्यद्वयं संकेतितम्। उत्तरमेघेऽपि कविकुलगुरुः प्रकारान्तरेण गीतस्य वैशिष्ट्यद्वयं विज्ञापयन् ब्रवीति– **उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्य वीणां मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा।**[15] अर्थाद्गीतं गोत्राङ्कं विरचितपदञ्च भवति। गोत्रं नामेति तदेवाङ्कश्चिह्नं वैशिष्ट्यं यस्य तद्गोत्राङ्कं भवति। अर्थात् नायको नायिकां प्रति नायिका च नायकं प्रति यदा तद्गीते स्वनाम योजयित्वा गानं कुरुतः तदा गोत्राङ्कं गानं भवति। गीतेऽस्मिन् विशेषतया स्वाभिप्रायस्य प्रकाशनं भवति। शकुन्तला गेयात्मके मदनलेखे विरहकालिकीं स्थितिं वर्णयन्ती स्वाभिप्रायरूपं गोत्राङ्कं प्रकाशयति।[16]

विरचितपदगीतं तद्भवति यस्मिन् विशेषरूपेण गायकस्य समीहितार्थसम्पादकानि पदानि भवन्ति। अर्थात् मर्मस्पर्शिपदैः संवलितं स्यात्। हंसपदिकायाः उपालम्भपूर्वकं गीतं विरचितपदस्यैव निदर्शनं वर्तते।

एवमेव मृच्छकटिकनामके प्रकरणेऽपि नायकः चारुदत्तः रेभिलगीतं प्रशंसन् गीतस्य वैशिष्ट्यमाचष्टे। तन्मते गीतं सुरसमन्वितं, मधुरं, श्रुतिसुखदं, स्फुटाशयं, संवेदनमयं, ललितं, हृदयावर्जकञ्च स्यात्।[17]

आधुनिकाचार्येषु राधावल्लभत्रिपाठी, रहसबिहारीद्विवेदी च गीतकाव्यस्य स्वरूपं लक्षयतः। आचार्यत्रिपाठिवर्यः ब्रवीति यत् खण्डकाव्यमेव यदा अन्त्यानुप्रासध्रुवकयोः समन्वितं भवति तदा गीतं कथ्यते–**तदेवान्त्यानुप्रासध्रुवकान्वितं गीतम्।**[18] गीतस्य वैशिष्ट्यं विज्ञापयन् त्रिपाठिवर्यः कथयति यत् गीतस्य संक्षिप्तता, भावमयता, रागाधारिता (रागाभिव्यञ्जिका), अथ चावसादविमुक्तता गीतगताः गुणाः भवन्ति।[19]

आचार्यरहसबिहारीद्विवेदी कथयति यत् रागाधारितं ध्रुवकसमन्वितं कञ्चिदेकमेव विषयविशेषमधिकृत्य समग्रं पूर्णं वा कथनं यत्र भवति तद्गीतं कथ्यते। अन्यच्चेदं सर्वथा मुक्तकाव्यवदेव भवति।[20]

## गीतस्य वर्गीकरणं भेदाश्च

मिश्रोऽभिराजराजेन्द्रः एतान् सर्वानपि सन्दर्भान् सम्यक्तया विविच्य गीतस्य वर्गीकरणं तस्य लक्षणोदाहरणानि प्रस्तौति। गीतमिदं ध्वन्यात्मकवर्णात्मकशब्दयोरिव धातुजः मातुजश्चेति भेदाभ्यां द्विविधं भवति। वीणावेण्वादियन्त्रमाध्यमेन गीयमानं गीतं धातुजं यन्त्रजं वा भवति।[21]

भरतमुनिः अमरसिंहश्च ततं, अवनद्धं, घनं, सुषिरञ्चेति भेदात् आतोद्यं

चतुर्विधममन्यत। एतयोः स्वरूपं प्रतिपादयति यत् तन्त्रीकृतं वीणादिकं ततं, मुरजादिकम् अवनद्धं, तालः घनं, वंशः सुषिरश्च भवन्ति।[22]

**शास्त्रीयगीतम्**

अभिराजराजेन्द्रमिश्रवर्यः द्विविधमपि गीतं शास्त्रीयं लौकिकमिति रूपेण वर्गीकृत्य कथयति यद्धातुजः मातुजश्चेत्युभयात्मकं गीतमिदं यदा संगीतशास्त्रीयभैरवी–मल्हारादिरागा-धारितं भवति तदा रागकाव्यं शास्त्रीयगीतं वा कथ्यते।[23]

अभिनवगुप्ताचार्यः स्वाभिनवभारत्यां रागकाव्यस्य नैकानि उदाहरणानि प्रस्तौति- राघवविजयमारीचवधादिकं रागकाव्यम्..........तथा हि राघवविजयस्य हि ढक्करागेणैव विचित्रवर्णनीयत्वेन निर्वाहः। मारीचवधस्य ककुभरागेणैव। अत एव रागकाव्यान्युच्यन्त एतानि।[24] इत्थं ढक्ककुभादिविविधशास्त्रीयरागैः गीयमानं गीतं रागकाव्यं भवति। रागकाव्यस्य साम्प्रतमपि बहूनि उदाहरणानि प्राप्यन्ते। यथा जयदेवस्य '**गीतगोविन्दम्**' अन्यच्च '**गीतगिरीशम्**', '**गीतगौरीशम्**', '**गीतपीतवसनम्**', '**गीतगङ्गाधरः**', '**रामगीत-गोविन्दादीनि**' प्रमुखानि रागकाव्यानि सन्ति। आचार्यराधावल्लभत्रिपाठी रागकाव्यं लक्षयति यद्विविधरागमाधृत्य गीयमानं ध्रुवकसमन्वितञ्च काव्यं रागकाव्यं कथ्यते–**विविधैः रागैर्गेयं ध्रुवकान्वितगीतिसंयुतं रागकाव्यम्।**[25] आचार्यरहस-बिहारीद्विवेदी 'रागलक्षणसंयुक्तं गेयं गीतं **ध्रुवान्वितमि**[26] त्यादिना गीतं लक्षयन् रागकाव्यस्येव वैशिष्ट्यं प्रतिपादितवान्। एवं शास्त्रीयरागाधारितं गीतं रागकाव्यं शास्त्रीयगीतं वा कथ्यते।

**लोकगीतम्–**

लोकः अर्थाज्जनसामान्यः तद्विरचितं तत्र विश्रुतं वा गीतं लोकगीतं कथ्यते। परम्परातः समागतत्वात् प्रायशः अज्ञातलेखकमिदं लोकगीतं भवति। अत्र भावानुकूल-हृदयस्य सहजाभिव्यक्तिर्भवति। सरलभाषा सरलरीतिः, लोकसंगीतस्य सरललयात्मिका गतिः रसात्मकता स्वच्छन्दता चेति अस्य प्रमुखानि वैशिष्ट्यानि सन्ति। हिन्दीसमीक्षकाः लोकगीतस्य पर्याप्तलोकप्रियतायाः कारणद्वयं स्वीकुर्वन्ति। प्रथमं सरललयात्मकता द्वितीयम् अस्य सामूहिकभावभूमिश्चेति।[27] अत्र जनसामान्यानां भावनाः निहिताः भवन्ति। लोकगीतमिदं सामाजिकधार्मिकपरम्परायाः वाहकं रक्षकञ्च भवति। शास्त्रीयरागाद्भिन्नं स्वेच्छया कण्ठध्वन्यनुसारं कुल–जाति–ग्राम–जनपद–प्रदेशानां परम्परानुमतं सुखेन गीयमानं झटित्यानन्दसन्दोहकारकं रसोत्पादकञ्च भवति। लोकगीतस्य रागः पूर्णतया लोकपरम्परानुगत एव भवेत्। यद्यपि गानकौशलनिपुणो गायकः लोकगीतमपि शास्त्रीयरीत्या

रागकाव्यञ्च लोकगीतरीत्यां गायति। तथापीदं तस्य वैचक्षण्यमात्रं भवति। न द्वयोः मिश्रणस्य कश्चन प्रसङ्गः। लोकगीतस्य प्रमाणं लोक एव स्वीकरणीयं रागकाव्यस्य पुनः सङ्गीतशास्त्रम्।[28]

इत्थं संगीतशास्त्रज्ञानरहितग्रामजनपदनिवासिभिः सामान्यजनैः स्वकुलजाति-परम्परानुकूलं सुखेन यद्गीयते तदेव लोकगीतं भवति। जनपदे प्रसिद्धं लोकगीतं यथा मथुरायां **रसिका**, बङ्गप्रदेशे '**बाउल**', छत्तीसगढप्रदेशे '**पाण्डवानी**', हरियाणाप्रदेशे '**रागिणीलोकगीतम्**' गुर्जरप्रदेशे '**दण्डरासकगीतम्**', महाराष्ट्रे '**अभङ्गम्**' अथ चोत्तरप्रदेशे **सूतगृह–नक्तक–प्रचरण–वटुक–स्कन्धहारीय–चैत्रक–फाल्गुनिकादीनि** लोकगीतानि प्रथितानि सन्ति। लोकगीतमिदं प्रायशः नवर्तूनामागमने विविधपर्वणि गृहे मङ्गलोत्सवे धर्मसंस्कृत्योः विशेषावसरे गीयते।[29]

लोकगीतस्यावाप्तिः यद्यपि जनसामान्येषु मौखिकरूपेणैव भवति परं साम्प्रतं लोकगायकानां तद्गीतानि ध्वनिमुद्रणयन्त्रमाध्यमेन सुरक्षितानि सन्ति। अथ च तदेव लयात्मकत्वं सरलभावत्वञ्चाधिकृत्य नूतनानि लोकगीतान्यपि विरच्यन्ते। संस्कृते लोकगीतस्य रचना स्फुटतया तु न कुत्रापि जाता न वा प्रयुक्तास्ति परं संस्कृतकाव्यानां विविधप्रसङ्गेषु तस्याः परम्परायाः सङ्केतो लभ्यते। वाल्मीकिरामायणे रामजन्मोसवे 'सोहर' इति लोकगीतस्य गायनं भवति। एवमेव कालिदासस्य उत्तरमेघे विरहिणी यक्षिणी वर्षर्तौ स्वप्रियामिलनाभिकाङ्क्षिणी विरहजनितदुःखापनोदनाय वीणां वादयन्ती गायति। भावभूमिरियं 'कजरी' नामकस्य लोकगीतस्य स्वीकर्तुं शक्यते।

इत्थमुपर्युक्ततथ्यमधिकृत्य वक्तुं शक्यते यद्बाहुल्येन गीतात्मकप्रकृतेः काव्यस्य संस्कृतसाहित्ये प्रयोगेणापि तद्रचनाय निर्देशनं व्याख्यानं वा न कुत्रचिदपि स्वतन्त्रतया प्राप्यते। आचार्य–अभिराजराजेन्द्रमिश्रप्रभृतयः आधुनिकसाहित्यसमीक्षकाः स्वकाव्यशास्त्रीय-ग्रन्थे एतस्यां दिशि महत्त्वपूर्णं योगदानं ददति।

***

**सन्दर्भाः–**

1. गीतं गानमिमे समे–अमरकोशः 1, शब्दादिवर्गः (6) 27। गीतं गानमिति प्रोक्तम् – हलायुधकोशः 1.9
2. अभिराजयशोभूषणम्, पृ.249
3. इति वा इति मे मनोगामश्वं सनुयामिति। कुवित्सोमस्यापामिति।
   प्रवाता इव दोधत उन्मा पीता असंयत। कुवित्सोमस्यापामिति। ऋग्. 8, अष्टकस्य 1,2
4. गीतम्, वाद्यम्, नृत्यम्, आलेख्यम्... इति चतुःषष्टिरङ्गविद्याः। का.सू.1, अ.3, अधिकरणम्
5. ना.शा. 4.300, पृ.65 इत्यस्य पादविवरणिकायाम्।
6. आसने चोपविष्टायां तन्त्री भाण्डोपबृंहितम्। गायने गीयते शुष्कं तद्गेयपदमुच्यते। तत्रैव 20.140
7. रागार्णवग्रन्थात् गीतगिरीशमिति भूमिकायामुद्धृतः।
8. ना.शा. 4 अध्यायः
9. तथाहि राघवविजयस्य हि ढक्कारागेणैव विचित्रवर्णनीयत्वेन निर्वाहः। मारीचवधस्य ककुभग्रामरागेणैव। अत एव रागकाव्यानि उच्यन्ते एतानि। ना.शा.4 अध्यायः, पृ.181
10. गीतिर्गीतञ्च गेयञ्च गानमेतन्मिथस्समम्।
    प्रत्ययाच्छब्दवैभिन्न्यं न पुनर्धातुयोगतः।। अ.य.भू. 5.9
11. अभिज्ञानशाकुन्तलम् 1, पृ.4
12. ईषदीषच्चुम्बितानि भ्रमरैः सुकुमारतरकेसरशिखानि।
    अवतंसयन्ति दयमानाः प्रमदाः शिरीषकुसुमानि।। तत्रैव 1, पृ.5
13. तवास्मि गीतरागेण हारिणा प्रसभं मनः।
    एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा।। तत्रैव 1, पृ.5
14. अभिनवमधुलोलुपो भवांस्तथा परिचुम्ब्य चूतमञ्जरीम्।
    कमलवसतिमात्रनिर्वृतो मधुकर विस्मृतोऽस्येनां कथम्।। तत्रैव 5, पृ.75
15. मेघदूतम् 26 (उ.)
16. तव न जाने हृदयं मम पुनः कामो दिवाऽपि रात्रावपि।
    निर्घृण! तपति बलीयस्त्वयि वृत्तमनोरथाया अङ्गानि।। अभिज्ञानशाकुन्तलम् 3.14
17. रक्तञ्च नाम मधुरं च समं स्फुटञ्च भावान्वितञ्च ललितञ्च मनोहरञ्च।
    किं वा प्रशस्तवचनैर्बहुभिर्मदुक्तैरन्तर्हिता यदि भवेत्वनितेव मन्ये।। मृच्छकटिकम् 3.4
18. अ.का.सू. 3.1.5
19. संक्षिप्तिर्भावमयता रागो व्यक्तिगतस्तथा।
    तानवं तानवान्मुक्तिरिमे गीतगता गुणाः।। तत्रैव, पृ.148
20. रागलक्षणसंयुक्तं गेयं गीतं ध्रुवान्वितम्। एकस्मिन्विषये रागे गीतानान्तु समुच्चयः।
    किन्तु गीतं भवेन्मुक्तं स्वयं पूर्णं स्वकथ्यतः। प्रायशः कविगोष्ठीषु गीतमेव प्रशस्यते।।
    आधुनिकसंस्कृतकाव्यसमीक्षणम्, पृ.45

21. धातुमातुसमायुक्तं यद्धि नादाऽक्षरात्मकम्। कर्णामृतं विभक्तञ्च द्विधा गीतं प्रशस्यते।।
धातुजं वेणुवीणादियन्त्रसञ्चयनिस्मृतम्। मातुजं मुखजं प्रोक्तं गानरूपेण संस्थितम्।।
अ.य.भू. 5.13-14
22. ततं चैवावनद्धं च घनं सुषिरमेव च। चतुर्विधं तु विज्ञेयमातोद्यं लक्षणान्वितम्।।
ततं तन्त्रीकृतं ज्ञेयमवनद्धं तु पौष्करम्। घनं तालस्तु विज्ञेयः सुषिरो वंश एव च।।
ना.शा. 6.28-29
23. गीतमेदद्यता रागैर्गीयते शास्त्रसम्मतैः।
काव्यं तादृशगीतानां रागकाव्यं समुच्यते।। अ.य.भू. 5.15
24. ना.शा., अ.4 अभिनवभारती टीकायाम्
25. अ.का.सू. 3.1.6
26. आधुनिकसंस्कृतकाव्यशास्त्रसमीक्षणम्, पृ.45
27. हिन्दी साहित्य का सरल इतिहास, राजनाथशर्मा, पृ.334-335
28. यत्पुनर्गीयते स्वैरं यथाकण्ठं यथासुखम्।
यथाजनपदग्राम-कुलजातिपरम्पराम्।।
तच्च सद्यो रसानन्ददायकं गतबन्धनम्।
शास्त्रीययनियमनिर्मुक्तं लोकगीतं समुच्यते।।
प्रमाणं लोकगीतानां लोक एव हि केवलम्।
यथावदङ्गीकर्त्तव्यः ततस्तद्धि यथास्थितम्।। अ.य.भू. 5.16, 17, 21
29. ऋतूनामागमं पर्वगृहमङ्गलमुत्सवम्।
धर्मसंस्कृतिरीतिं वा लोकगीतं समञ्चति।। तत्रैव 5.22

***

# संस्कृतस्य शास्त्रीयपरम्परायां टीकासाहित्यस्य स्थानम्

**ओम प्रकाश आर्यः**

**'शासु अनुशिष्टौ'**[1] इत्यस्मात् धातोः **शास्त्रशब्दः** सिद्ध्यति। शासनात् शंसनादिति शास्त्र–शब्दस्य परिभाषा अस्ति। अर्थात् यत्र कस्यापि विषयविशेषस्य शासनं कथनं वा प्राप्यते अथवा यत्र कस्यापि विषयविशेषस्य प्रशंसा दरीदृश्यते तच्छास्त्रं कथ्यते। अनया परिभाषया शास्त्रशब्दः व्यापकमर्थं धारयति। पं. भगवद्दत रिसर्च स्कॉलर महोदयेन ब्रह्मणा प्रोक्तानां द्वाविंशतेः शास्त्राणाम् उल्लेखः कृतोऽस्ति[2]–

1. वेदज्ञानम्, 2. ब्रह्मज्ञानम्, 3. योगविद्या, 4. आयुर्वेदः, 5. हस्त्यायुर्वेदः, 6. रसतन्त्रम्, 7.धनुर्वेदः, 8. पदार्थविज्ञानम्, 9. धर्मशास्त्रम्, 10. अर्थशास्त्रम्, 11. कामशास्त्रम्, 12.व्याकरणम्, 13.लिपिज्ञानम्, 14. ज्योतिषशास्त्रम्, 15. गणितशास्त्रम्, 16.वास्तुशास्त्रम्, 17. शिल्प-शास्त्रम्, 18. अश्वशास्त्रम्, 19. नाट्यवेदः, 20. इतिहासपुराणम्, 21. मीमांसाशास्त्रम्, 22. शिवस्तवं स्तवशास्त्रं वा।

अद्यत्वे प्रमुखानि षड् आस्तिकदर्शनानि शास्त्ररूपेण प्रसिद्धानि सन्ति। दर्शनादतिरिच्य व्याकरणशास्त्रम्, अर्थशास्त्रम्, धर्मशास्त्रम्, कामशास्त्रम्, वास्तुशास्त्रम्, इत्यादीनि शास्त्राण्यपि शास्त्ररूपेण विख्यातानि सन्ति। एषा समग्रा शास्त्रीया परम्परा व्याख्याभिः भाष्यैः वृत्तिभिश्च अत्यन्ता समृद्धा वेविद्यते। स्वमत्यनुसारेण भाष्यकाराः व्याख्याकाराश्च मूललेखकस्याभिप्रायं पाठकानां हितार्थम् अभिव्यक्तं कुर्वन्ति। अभिव्यक्त्याः अस्मिन् माध्यमे टीकासाहित्यस्य अत्यन्तं महत्त्वपूर्णं स्थानं वर्तते।

**'टीका'** शब्दः 'टीकृ'[3] धातोः **अच्प्रत्यये**[4] कृते तथा स्त्रीलिङ्गस्य विवक्षायां **'टाप्'**[5] प्रत्ययेन सिद्ध्यति। टीकृधातुः पाणिनीयधातुपाठे गत्यर्थे पठितोऽस्ति। धात्वर्थानुसारेण येन ग्रन्थेन तत्तद्विषये अध्येतुः गतिः भवति सा टीका कथ्यते। स्वल्पबुद्धिमन्तः जनाः देशस्य कालस्य परिस्थित्याश्च भिन्नत्वात् वक्त्रभिप्रायम् अवगन्तुम् अक्षमाः भवन्ति। टीकामाध्यमेन अल्पमतिः अपि लेखकस्य अभिप्रायम् अवगन्तुं समर्थो भवति।

संस्कृतस्य प्रसिद्धा उक्तिः **'टीका गुरूणां गुरुरिति'** अनेन टीकानां महत्त्वं स्वयमेव अभिव्यक्तं भवति। एतत् प्रसिद्धमस्ति यत् विषयस्याध्यापने यदि गुरुः नास्ति, तर्हि एव गुरोः आसने स्थातुं समर्था भवति। विद्वांसः जानन्ति यत् मूलग्रन्थस्य अभिप्रायं यथार्थरूपेण उपस्थापयितुं टीका केन प्रकारेण कान्तासम्मिततया उपदेशमाध्यमेन साहाय्यं प्रददाति। टीकासाहित्यस्य कृते अनुशीलनेन ज्ञायते यत् कतिपयाः टीकाः स्वकीयमहत्त्वात् इयत्यः प्रसिद्धाः सन्ति यत् पाठकाः तासां मूललेखकानां नामानि तथा तत्तद्ग्रन्थानां नामान्यपि नैव जानन्ति। न्यायशास्त्रस्य गदाधरीटीका, अन्नम्भट्टकृततर्कसंग्रहस्य दीपिकाटीका, तथा भर्तृहरेः महाभाष्योपरि लिखिता दीपिकाटीका इत्यादीनाम् अस्मिन्नर्थे अत्यन्तं महत्त्वमस्ति। संस्कृतसाहित्ये एतादृशाः अपि ग्रन्थाः दृश्यन्ते ये मूलरूपेण नोपलभ्यन्ते, तेषां ग्रन्थानां टीकाः एव पठनपाठनपरम्परायाः संवहनं कुर्वन्ति। संस्कृतसाहित्यस्य स्यादेव कोऽपि एतादृशः शास्त्रग्रन्थः यस्य कापि टीका न स्यात्।

व्याकरणमहाभाष्यस्य भावावबोधने यदि कैयटकृतप्रदीपटीका न स्यात् तर्हि कश्चित् विरल एव भाष्यस्य गूढाशयान् अवगन्तुं क्षमः स्यात्। पातञ्जलमहाभाष्योपरि याः टीकाः लिखिताः तासु वसुरातशिष्यभर्तृहरिविरचिता 'महाभाष्यदीपिका' नाम्नी टीका सर्वाधिका प्राचीना वर्तते। परं एषा टीका सम्पूर्णे महाभाष्ये नोपलब्धा वर्तते। भर्तृहरेः पश्चात् भाष्याशयस्य सम्यक् मीमांसां कर्तुम् आचार्येण कैयटेन 'प्रदीप' नाम्नी टीका लिखिता या 'अथ शब्दानुशासनम्' प्रभृति अष्टमाध्यायचतुर्थपादस्य अन्तिमं सूत्रं **'अ अ'**[6] यावत् विद्यमाना वर्तते। सम्प्रति एषा टीका महाभाष्योपरि पूर्णरूपेण उपलब्धा वर्तते। कैयटेन भाष्याब्धिं पारयितुं भर्तृहरेः आश्रयो लब्धः। भर्तृहरेः व्याख्यानं च सागरगभीरमहाभाष्याशयम् अवगन्तुं सेतुः मन्यते। शब्दानुशासनस्य पञ्चप्रयोजनेषु 'ऊहः' इत्यस्य विवेचनं कुर्वता कैयटेनोक्तम्– 'ऊहः' विस्तरेण भर्तृहरिणा दीपिकायां प्रदर्शितः– ''ऊहः खल्वपीति। इह यस्मिन् यागे इतिकर्तव्यतोद्दिष्टा यागान्तरेणोपजीव्यते सा प्रकृतिः। येनोपजीव्यते सा विकृतिः। 'प्रकृतिवद्विकृतिः कर्तव्या' इति मीमांसकैर्व्यवस्थापिते न्याये प्रकृतिप्रत्ययादीनामूहः वैयाकरणः सम्यग्विजानाति तत्राग्नेर्मन्त्रोऽस्ति– 'अग्नये त्वा जुष्टं निर्वपामि' इति। तत्र 'सौर्यं चरुं निर्वपेद् ब्रह्म–वर्चसकामः' इति सौर्ये चरौ मन्त्र ऊह्यते– 'सूर्याय त्वा जुष्टं निर्वपामि' इति विस्तरेण तु भर्तृहरिणा प्रदर्शितः ऊहः।''[7] 'स्त्रियाम् सूत्रस्योपरि श्लोकवार्तिकं विवर्णयन् स्वविचारस्य पुष्टिं भर्तृहरिः निम्नकारिकया करोति–

**हस्तिन्यां वडवायाञ्च स्त्रीति बुद्धेः समन्वयः।**
**अतस्तां जातिमिच्छन्ति द्रव्यादिसमवायिनीम्।।**[8]

'स्त्रियाम्' सूत्र एव खट्वादिषु स्त्रीत्वस्य सिद्ध्यर्थं भाष्यस्य टीकां कुर्वाणस्य भर्तृहरेः कारिकाः एवं सन्ति–

**यथा सलिलनिर्भासो मृगतृष्णासु जायते।**
**जनोपलब्ध्यनुगुणाद् बीजाद् बुद्धेर्जलेऽसति।।**
**तथैवाऽव्यपदेश्येभ्यो हेतुभ्यस्तारकादिषु।**
**मुख्येभ्य इव लिङ्गेभ्यो भेदे लोका व्यवस्थिताः।।**[9]

कैयटेन स्वीयायां प्रदीपटीकायाम् आवश्यकतानुसारं प्रायेण भाष्यस्य प्रतिपङ्क्तीनां व्याख्यानं कृतमस्ति।

अद्य यदि कैयटस्य प्रदीपटीका न स्यात् तर्हि महाभाष्यसदृश–दुरूहग्रन्थस्य अवबोधनम् अतिदुष्करं स्यात्। यद्यपि भाष्यस्य भाषा सरला, नास्त्यस्मिन् कश्चित् सन्देहः पुरनपि केषुचित् स्थलेषु भाष्यस्य अभिप्रायार्थावबोधने काठिन्यं भवति। एतादृशस्थलानि कैयटस्य प्रदीपटीकया सुतरां स्पष्टानि भवन्ति। यथा–

(क) महाभाष्यस्य प्रथमे आह्निके वर्णोपदेशप्रसंगे 'संवृत्तः, कलः, ध्मातः, एणीकृतः, अम्बूकृतादयः स्वरदोषाः उक्ताः परं एणीकृत–अम्बूकृत–ध्मातादीनां शब्दानां कोऽभिप्रायः? इति स्पष्टं न क्रियते। कैयटः एतेषां प्रतिशब्दानां व्याख्यां लिखति– ''एकारादीनां संवृतत्वं दोषः न त्वकारस्य तस्य संवृतगुणत्वात्। तत्र सन्ध्यक्षरेषु विवृतत्वमेषूच्चार्येषु संवृतत्व दोषः। कलः स्थानान्तरनिष्पन्नः काकलीत्वेन प्रसिद्धः। ध्मातः श्वासभूयिष्ठतया ह्रस्वोऽपि दीर्घ इव लक्ष्यते। एणीकृतोऽविशिष्टः, किमयमोकारः? अथौकार इति यत्र संदेहः। अम्बूकृतो यो व्यक्तोऽप्यन्तर्मुख इव श्रूयते। अर्धको दीर्घोऽपि ह्रस्व इव। ग्रस्तो जिह्वामूले निगृहीतः, अव्यक्तः इत्यपरे। निरस्तो निष्ठुरः। प्रगीतः सामवदुच्चारितः। उपगीतः समीपवर्णान्तरगोत्यनुरक्तः। क्ष्विण्णः कम्पमान इव। रोमशो गम्भीरः। अविलम्बितो वर्णान्तरसंभिन्नः। हतो रुक्षः। संदिष्टो वर्धित इव। विकीर्णो वर्णान्तरे प्रसृतः, एकोऽप्यनेकनिर्भासीत्यपरे।''[10]

(ख) इत्यथमेव व्याकरणाध्ययनस्य मुख्यप्रयोजनेषु 'रक्षा' शब्दस्य व्याख्यां कैयटः एवं करोति– ''रक्षेति। लोके लोपाद्यदृष्टं वेदे दृष्ट्वा भ्राम्येदवैयाकरणः, वैयाकरणस्तु न भ्राम्यति, वेदार्थं चाध्यवस्यति। तत्र लोपागमयोरुदाहरणं 'देवा

अदुह्न' इति। दुहेर्लङो झस्यादेशे कृते **'लोपस्त आत्मनेपदेषु'**[11] इति तलोपः, **'बहुलं छन्दसि'**[12] इति रुटि सति रूपमेतत्। वर्णविकारो यथा– 'उद्ग्राभं निग्राभं च' इति। 'हृग्रहोर्भश्छन्दसि' **'हस्येति वक्तव्यम्'**[13] इति हस्य भकारः। **'उदि ग्रहः'**[14] इत्यत्र 'उद्ग्राभनिग्राभौ च छन्दसि स्रुगुद्यमननिपातनयोः' इति वचनादुन्निपूर्वाद्ग्रहे–र्घञ्।''[15] एतैः उदाहरणैः महाभाष्यस्य व्याख्यायां कैयटकृतप्रदीपटीकायाः महत्त्वं सम्यग् रूपेण सुस्पष्टं भवति। कैयटः स्वकीयटीकायां भाष्यकारस्य प्रश्नोत्तरपद्धयां पृष्टे प्रश्नानां संगतिमपि प्रदर्शयति। यथा–**'अङ्गस्य'** सूत्रस्योपरि भाष्यकारस्य प्रश्नः अस्ति– **''आ कृतोऽयमधिकारः?''**

अस्य प्रश्नस्य संगतिं कैयटः एवं करोति–**अवधिविशेषनिश्चये प्रमाणमदृष्ट्वा पृच्छति।**[16] कैयटस्य लेखनशैल्याः एको विशिष्टो गुणोऽस्ति– सः स्वकीयटीकायां आरम्भ एव तद्विषय–सम्बन्धितानेकपक्षाणाम् उल्लेखं करोति। यथा– 'आतो लोप इटि च' सूत्रस्योपरि भाष्यकारस्य वचनमस्ति– 'अथेङ्ग्रहणं किमर्थम्'? अस्योपरि कैयटः लिखति– 'आतो लोप इटि च' अनुवर्तित 'अचि-क्ङिति-आर्धधातुके' इति त्रयाणां प्रकृतत्वाद्विशेषणविशेष्याभावे च कामचारात् तेषामन्यतमेनानुभूतविशेषणेनाननुभूतविशेषणेन वा इटः समुच्चयसम्भवादनेकपक्षसम्भवः।''[17]

इत्थमेव 'तुल्यास्यप्रयत्नं सवर्णम्' सूत्रस्य महाभाष्योपरि 'तुल्यास्यप्रयत्नम्' इत्यत्र चतुर्णां पक्षाणाम् उल्लेखः कैयटेन स्वप्रदीपटीकायां कृतोऽस्ति–'चत्वारोऽत्र पक्षाः सम्भवन्ति– द्वन्द्वगर्भो बहुब्रीहिः, त्रिपदो बहुब्रीहिः, तुल्यास्यशब्दयोस्तत्पुरुषस्ततो बहुब्रीहिः, आस्यप्रयत्नशब्दयोस्तत्पुरुषस्ततो बहुब्रीहिः इति।''[18]

कैयटस्य पश्चात् महाभाष्यस्य स्वतन्त्ररूपेण व्याख्याता टीकाकारः 'शिवरामेन्द्र सरस्वती' अभवत्। अनेन 'महाभाष्यसिद्धान्तरत्नप्रकाशनाम्नी टीका लिखितास्ति। प्रतीयते यत् एषा टीका विशेषरूपेण कैयटप्रदीपस्य खण्डनार्थं लिखितास्ति। अस्यां टीकायां पदे–पदे कैयटवचनान्युद्धृत्य तस्य युक्तियुक्तपूर्वकं खण्डनं कृतमस्ति। यथा– **वृद्धिरादैच्।**[19] सूत्रे कैयटकृतप्रदीपटीकायाः खण्डनं शिवरामेन्द्रकृतरत्नप्रकाशटीकायां द्रष्टुं शक्यते। रत्नप्रकाशस्य पश्चादपि टीकाः लिखिताः परं ताः टीकाः कैयटकृतप्रदीपटीकाः एव आधारीकृत्य लिखितास्सन्ति। एतासु टीकासु नारायणशास्त्रिकृत 'नारायणीयम्' टीकायाः महत्त्वपूर्णं स्थानं विद्यते। एषा टीका व्याकरणतथ्यानि दार्शनिकशैल्यां प्रकटीकुर्वन्ति। वाचस्पतिमिश्रकृतभामतीटीकायाः प्रमाणरूपे प्रस्तुतीकरणे अस्याः टीकायाः वैशिष्ट्यं वर्तते। कात्यायनवार्तिकानां गहनविश्लेषणं प्रदीपकारस्य कैयटस्य च औचित्यस्य

अनौचित्यस्य मीमांसापि अस्यां टीकायां कृतास्ति। पं. युधिष्ठिर मीमांसकेन स्वीये ग्रन्थे प्रदीपस्य पञ्चदश टीकाकाराणाम् उल्लेखः कृतोऽस्ति,[20] पर प्रदीपोपलब्धासु एतासु सर्वासु टीकासु अन्नम्भट्टस्य 'उद्द्योतनम्' नागेशभट्टस्य च 'उद्द्योत' टीका एव सम्पूर्णे प्रदीपे उपलब्धा भवति। व्याकरणवाङ्मये अन्नम्भट्टकृत–उद्द्योतनटीकापेक्षया नागेशभट्टस्य 'उद्द्योत' टीका अधिका प्रसिद्धा वर्तते। केवलं भाष्याभिप्रायमात्रं स्पष्टीकरणमेव अस्याः टीकायाः वैशिष्ट्यं नास्ति अपितु यावत् ये पक्षाः अनुद्धृताः तेषां स्पष्टीकरणमपि अस्याः टीकायाः स्वकीयं पृथक् वैशिष्ट्यं वर्तते। यथा– 'चत्वारि' नाम्ना मन्त्रद्वयस्य व्याख्या महाभाष्ये प्राप्नोति। भर्तृहरिस्तु एतं 'नामाख्यातोपसर्गनिपाताश्च' अपि न कथयति अपितु स्वकीयाल्पटिप्पणीं दत्त्वा अग्रे सरति–'कर्मप्रवचनीयस्तु निपातेष्वन्तर्भूतः इति चत्वायुर्युज्यते।' कैयटः चतुर्णाम् उल्लेखम् अवश्यमेव करोति परं नागेशः 'परापश्यन्तीमध्यमावैखर्यः' इति रूपेण स्वकीयां नवीनानुभूतिं प्रस्तौति या तस्य युगव्याप्तचिन्तनं व्यक्तीकरोति। नागेशभट्टेन अन्नम्भट्टेन च द्वाभ्यामेव महाभाष्यप्रदीपस्य टीका लिखितास्ति परं द्वयोः साध्यसाधनयोः बह्वन्तरं विद्यते। यथा नागेशभट्टः प्रदीपस्य टीकया सहैव महाभाष्यस्योपरि विश्वसिति तथा प्रदीपकारः कैयटः यत्र भाष्यविचारं अनुचितं मन्यते तत्र 'चिन्त्यमेतत्' उक्त्वा स्वकीयां विमतिं दर्शयति। एतादृशस्थलेषु नागेशभट्टः सूक्ष्मविचारं करोति तथा कैयटोक्तिं 'चिन्त्यमेव चिन्त्यम्' इत्युक्त्वा प्रदीपस्य खण्डनं कृत्वा भाष्यकारस्यैव मण्डनं करोति। उदाहरणार्थं '**सन्वल्लघुनि चङ्परेऽनग्लोपे**'[21] सूत्रे प्रदीपम् उद्द्योतं च द्रष्टुं शक्यते। अस्याः प्रतिकलम् अन्नम्भट्टः प्रदीप–पदाशयं स्पष्टं कुर्वाणः विविधप्रकाराणां प्रदीपवाक्यानाम् अभिप्रायमेव प्रस्तौति। अन्नम्भट्टस्य भाषा सरला परं नागेशभट्टस्य भाषा प्रौढा वर्तते। अष्टाध्याय्याः टीकाकारेषु पं. युधिष्ठिर-मीमांसकमहोदयेन जिनेन्द्रबुद्धेः, पं. हरदत्त मिश्रस्य च उल्लेखः कृतोऽस्ति। जयादित्यवाम-नविरचितकाशिकाशयम् अवगन्तुं न्यासपदमञ्जरीनामकस्य टीकाग्रन्थस्य कियती आवश्यकता वेविद्यते अस्यानुभवः ग्रन्थानुशीलनकर्तृच्छात्राणामेव भवितुं शक्यते। न्यासं पदमञ्जरीं च पृथक् कृत्वा काशिकावृत्तेः भावगाम्भीर्यग्रहणम् अत्यन्तं दुरूहं प्रतीयते। एतत् तथ्यं विद्वज्जनतिरोहितं नास्ति। सम्पूर्णं व्याकरणवाङ्मयं टीकाग्रन्थैः परिपूर्णं वर्तते। वस्तुतः अनेनैव कारणेन शास्त्रमेतत् एतावत् समृद्धं एतावच्च परिपूर्णं दरीदृश्यते।

संस्कृतस्य शास्त्रीयसंसारः टीकाभिः एतावान् परिपूर्णो विद्यते यत् यदि केवलानां टीकानामेव परिचयः दीयेत तर्हि तस्य कृते पृथक् रूपेण एकः कोषग्रन्थः सम्पत्स्यते। विभिन्नशास्त्रेषु कतिपयानां ख्यातिप्राप्तटीकानां चर्चया ज्ञायते यत् कतिपयाः टीकाः

स्वकीयप्रौढ–प्रस्तुत्या इयत्यः प्रसिद्धाः सन्ति यत् तासां पठनपाठने मूलग्रन्थाः एव विस्मृताः सञ्जाताः। न्यायदर्शनस्योपरि उद्द्योतकरेण 'न्यायवार्तिकनाम्ना' एका टीका लिखितास्ति, यस्य सम्बन्धे सुबन्धुना वासवदत्तायां लिखितमस्ति– ''न्यायसंगतमिवोद्द्योत-करस्वरूपा'' अनेन ज्ञायते यत् एषा टीका कियती कीर्तिमती वर्तते। न्यायवार्तिकस्योपरि अपि वाचस्पतिना तात्पर्यटीकायाः रचना कृता, या इयती प्रसिद्धा जाता यत् वाचस्पतिमिश्रः तात्पर्याचार्यनाम्ना न्यायजगति विख्यातः सञ्जातः। वाचस्पतिमिश्रमहोदयेन स्वयमेव उद्द्योतकारस्य वाणीम् 'अतिजरति' इति प्रोच्य संबोधितः। गंगेशोपाध्यायविरचितः तत्त्वचिन्तामणिः प्राचीनन्यायधारां परिवर्त्य नव्य–न्यायं स्थापितवान्। तत्त्वचिन्तामणेरुपरि अपि अनेकैः टीकाकारैः टीकाः लिखितास्सन्ति। वैशेषिकदर्शनस्य प्रशस्तपादभाष्योपरि लिखिता व्योमवती, किरणावली, न्यायकन्दली, न्यायलीलावती इत्यादयः टीकाः वैशेषिकदर्शनस्य दार्शनिकतां तथा तस्य गहनतमं स्वरूपं प्रददाति। सांख्यदर्शनस्योपरि अपि शंकराचार्यविरचिता जयमंगला टीका, नारायणतीर्थस्य चन्द्रिका टीका, तथा सांख्यसिद्धान्तेषु लिखिताः ग्रन्थाः सांख्यकारिकायाः माठरवृत्तिः, मुक्तिदीपिका टीका, तत्त्वकौमुदीसदृश्यः अनेकाः टीकाः सन्ति। योगदर्शनस्य व्यासभाष्योपरि लिखिता तत्त्ववैशारदी टीका, यस्य लेखकः वाचस्पतिमिश्रः, योगशास्त्रस्योपरि महत्त्वपूर्णा टीका वर्तते। मीमांसादर्शनस्य शाबरभाष्योपरि टुप्टीका, कुमारिलशिष्य– उम्बेकस्य तात्पर्य–टीका, वाचस्पतिमिश्रस्य न्यायकणिका, न्यायरत्नाकरटीका, मयूखमालिका टीका, वेदान्त–देशिकायाः मीमांसापादुका, भाट्टकौस्तुभटीका, भाट्टचिन्तामणिटीका, अन्नम्भट्टस्य सुबोधिनी इत्यादयः शतशः टीकाः प्राप्यन्ते। वेदान्तदर्शनस्य शांकरभाष्यः तथा तस्योपरि लिखिता ब्रह्मसिद्धिटीका, वाचस्तपेः ब्रह्मतत्त्वसमीक्षा, पद्मपादरचिता प्रपञ्चसारटीका, वाचस्पतेः भामतीटीका, विमुक्तात्मानः इष्टसिद्धिसदृश्यः अनेकाः टीकाः पठनपाठनपरम्परायां वेदान्तदर्शनस्य सारमवगन्तुम् अत्यन्तोपयोगिन्यः संजाताः।

इत्थम् एतत् निर्भ्रान्तमस्ति यत् संस्कृतशास्त्रीयजगति टीका–साहित्यम् अमोघरूपेण मूलग्रन्थानां भाष्याणां चाभिप्रायार्थं बोधयितुम् उपादेयं विद्यते। 'टीका गुरूणां गुरुः' अस्याः उक्तेः प्रसिद्धिमनु टीकासाहित्यस्य उपादेयता एव परिलक्षिता भवति। संस्कृतवाङ्मयात् यदि टीकासाहित्यं पृथक् क्रियते तर्हि सम्पूर्णं संस्कृतवाङ्मयं निबिडान्धकारमयं भविष्यति। अतः एतत् कथनं सर्वथातिशयोक्तिपूर्णं न भविष्यति यत् टीकासाहित्यं शास्त्रस्य प्राणाः वर्तते। अस्मिन् सम्बन्धे दण्डिना शब्दाह्वयज्योतिर्विषये यत् कथितं तदेव वयं टीकासम्बन्धे इत्थं वक्तुं शक्नुमः–

**इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम्।**
**यदि टीकाख्यज्योतिस्तच्छास्त्रसारं न दीपयेत्॥**

***

**सन्दर्भाः–**


1. पाणिनीयधातुपाठः अदादिगणः 2.70
2. भारतवर्ष का बृहत् इतिहास
3. पाणिनीधातुपाठः भ्वादिगणः
4. अष्टाध्यायी 3.1.134 नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः।
5. अजाद्यतष्टाप् 4.1.4
6. अष्टाध्यायी 8.4.64
7. महाभाष्यं प्रथमाह्निकम् 'ऊहः' इत्यत्र प्रदीपटीका
8. वाक्यपदीयं तृतीयकाण्डं लिङ्गसमुद्देशः कारिका–5
9. वाक्यपदीयं तृतीयकाण्डं लिङ्गसमुद्देशः कारिका–8-9
10. महाभाष्यं प्रथमाह्निकम् 'संवृतः' इत्यत्र कैयटः
11. अष्टाध्यायी 7.1.41
12. अष्टाध्यायी 7.1.8
13. अष्टाध्यायी 3.1.84 इत्यत्र वार्तिकम्
14. अष्टाध्यायी 3.3.35
15. महाभाष्यं प्रथमाह्निकम् 'रक्षा' शब्दोपरि प्रदीपटीका
16. महाभाष्यम् 6.4.1 सूत्रे प्रदीपटकीका
17. महाभाष्यम् 6.4.64 सूत्रे प्रदीपटीका
18. महाभाष्यम् 1.1.9 सूत्रे प्रदीपटीका
19. महाभाष्यम् 1.1.1 सूत्रे रत्नप्रदीपटीका
20. संस्कृतव्याकरणशास्त्र का इतिहास
21. महाभाष्यम् 7.4.96 सूत्रे प्रदीपटीका एवञ्च उद्द्योतटीका


***

## किञ्चिद् रामायणीयम्

### अरण्यकाण्डम्

*** मारीचः रावणं वक्ति–**

**रामः कीदृशः?**

(i) न पित्रा परित्यक्तः,
न दुःशीलः,
न क्षत्रियपांसनः,
न धर्मगुणैः हीनः,
कौशल्यानन्दवर्धनः,
न तीक्ष्णः भूतानाम्,
सर्वभूतहिते रतः,
न कर्कशः,
न अविद्वान्,
न अजितेन्द्रियः। 37/8-12

(ii) रामः विग्रहवान् धर्मः
साधुः
सत्यपराक्रमः
सर्वस्य लोकस्य राजा (देवानां वासवः इव) 37/13

(iii) रामस्य तेजः अप्रयेयम् 37/18

(iv) रामः नरसिंहः सिंहोरस्कः 37/19

* **मारीचभाषया राक्षसाः-**

क्रीडारतिविधिज्ञाः,
समाजोत्सवदर्शिनः। 38/24
दिव्यचन्दनदिग्धाङ्गाः,
दिव्याभरणभूषिताः। 38/28

* **परपापस्य दुष्परिणतिः-**

अकुर्वन्तोऽपि पापानि शुचयः पापसंश्रयात्।
परपापैर्विनश्यन्ति मत्स्या नागह्रदे यथा।। 38/26
बहवः साधवो लोके युक्ता धर्ममनुष्ठिताः।
परेषामपराधेन विनष्टाः सपरिच्छदाः।। 39/21